ओं **सिद्धो वर्णसमाम्नायः** वर्णानामकारादीनां वर्णानां य समाम्नायः क्रमेण पाठः सः सिद्धः प्रसिद्धः लोके इति किं तेनोपदिष्टेन आविद्वदङ्गनागोपालबालपर्यन्तं यावत् वर्णाः ४९ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ॥ क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह। वर्णसंज्ञया क्व प्रयोजन सर्वत्र॥ **तत्र चतुर्दश आदौ स्वराः** ॥ तत्र प्रसिद्धे वर्णसमाम्नाये आदौ ये चतुर्दश वर्णास्ते स्वरसंज्ञा भवन्ति स्वराः १४ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ स्वरसंज्ञया क्व प्रयोजनं रोरे लोपं स्वरश्च पूर्वो दीर्घ इत्यादिषु॥ **दश समानाः** ॥ तत्र प्रसिद्धे वर्णसमाम्नाये आदौ ये दश वर्णाः। ते समानसंज्ञा भवन्ति समाना १० अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ समानसंज्ञया क्व प्रयोजनं समानः सवर्णे दीर्घी भवति परश्च लोपम् इत्यादिषु॥ **तेषां द्वौ द्वावन्योन्यस्य सवर्णौ** तावन्योन्यस्य परस्परं सवर्णसंज्ञौ भवतः॥ सवर्णः १० अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ कः कस्य सवर्णः अकारस्य आकारः सवर्णः

आकारस्य अकारः सवर्णः उकारस्य ऊकारः सवर्णः ऊकारस्य उकारः सवर्णः ॠकारस्य ॠकारः सवर्णः ॠकारस्य ॠकारः सवर्णः लृकारस्य लृकार सवर्णः लृकारस्य लृकारः सवर्णः ॥

## पुष्पिका

इति लघुवृत्तौ नामप्रकरणे स्त्रीप्रत्ययपादः समाप्तः सप्तमः ॥ ७ ॥ नामप्रकरणं समाप्तम्
इति लघुवृत्तावाख्यातप्रकरणे घुट्पादोऽष्टमः ॥ ८ ॥ आख्यातप्रकरणं समाप्तम् ॥

## अन्तः

**अवर्णादूटो वृद्धिः** ॥ अवर्णात्परस्य ऊटो वृद्धिर्भवति भावयतीति भौः यावयतीति यौः भू स यु मि भवन्तं यवन्तं प्र इन् क्विप् कारितलोपः च्छ्वोः शूटाविति वस्य ऊट् इकार ॥ इहार्थः अनेन वृद्धिः शास्त्रान्ते वृद्धिशब्दो मङ्गलार्थः ॥ इति श्रीलघुवृत्तौ कृत्प्रकरणे धातुसंबन्धपाठः षष्ठः समाप्तः ॥ शुभम् ॥

---

**१३७**

**१९२ कामधेनुतन्त्रम् ।**

महादेवप्रोक्तम्

पुस्तकमिदं देवनागराक्षरलिपिकं नवीनं नवावस्थं संपूर्णम् । पत्रसंख्या २१ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४ । संनिवेशः १२ $\frac{५}{८}$ × ९ $\frac{१}{२}$ ।

## आरम्भः

ओं नमः परदेवतायै
श्रीपार्वत्युवाच

**देवदेव महादेव सर्वागमविशारद ।**
**अधुना देवदेवेश पञ्चाशद्वर्णमुत्तमम् ।**
**तत्त्वं रूपं महादेव कथयस्व दयानिधे ।**
**कृपया कथयेशान यद्यहं तव वल्लभा ॥**

श्रीमहादेव उवाच

**अधुना संप्रवक्ष्यामि रहस्यमतिगोपनम् ।**
**येन विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥**

**अन्तः**

**अनुलोमविलोमेन जप्त्वामृतमयो भवेत्।**
**केवलं कामिनीं ध्यात्वा प्रफुल्लवदनान्तराम् ॥**
**बीजादुत्पद्यते देवो देवी वा कमलेक्षणे।**
**ततस्तु देवतां ध्यात्वा निरीक्ष्य देवविग्रहम्॥**

**पुष्पिका**

इति श्रीकामधेनुतन्त्रे महादेवमहादेवीसंवादे एकविंशतितमः पटलः समाप्तः शुभम् ॥

अस्मिंस्तन्त्रे पटलेषूद्दिष्टा विषयाः।

१-६. अक्षराणां तत्त्ववर्णादिविनिर्णयः।
७. मातृकामन्त्रनिर्णय-ध्यानादिविधिः।
८. मातृकायास्तत्त्वार्थवर्णनम्।
९. मन्त्रस्य जीवन्यासक्रमनिरूपणम्।
१०. मातृकामूर्तिन्यासनामादिकीर्तनम्।
११. बीजध्याननिर्णयः।
१२. जीवन्यासान्तर-वर्णाधिदेवीध्यानादिनिरूपणम्।
१३. मन्त्रबीजध्यान-तत्त्वत्रयादिवर्णनम्।
१४. वकार-ककारध्यान-तिलकविधिः।
१५. हृत्तत्त्वादिनिरूपणम्।
१६. संदीपिनीविद्याविधानम्।
१७. ककारोपासनादिक्रमः।
१८. विद्यान्तरविधाननिरूपणम्।
१९. निद्राभङ्गविद्यादिवर्णनम्।
२०. मन्त्रजपसमर्पणनिर्णयः।
२१. कामिनीजपगुणकालगुणादिवर्णनम्।

---

**१३९**

**९९५ कामाख्यातन्त्रम्।**

शिवप्रोक्तम्

एतत् हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णम्। नवसु पटलेषु विरचितसंदर्भणोपन्यासम्। पत्रसंख्या १६ । प्रतिपृष्ठं श्रेणिसंख्या २२-२४। प्रतिश्रेण्यक्षरसंख्या २१। पत्रसंनिवेशः १२ ५/८ × ९ १/४ ।

**आरम्भः**

ॐ श्रीगणेशाय नमः ॐ नमः परदेवतायै।

देव्युवाच॥

**भगवन् सर्वधर्मज्ञ सर्वविद्याप्रिय प्रभो।**
**सर्वदानन्दहृदय सर्वागमप्रकाशक ॥**
**श्रुतानि सर्वतन्त्राणि साधनानि च भूरिशः।**
**विद्यास्ताः सकला देव फलानि त्वत्प्रसादतः॥**

श्रीशिव उवाच

**शृणु देवि मुद्रा भद्रे मदीयप्राणवल्लभे।**
**योनिरूपा महाविद्या कामाख्या वरदायिनी॥**
**.................................................।**
**तस्यास्तन्त्रं प्रवक्ष्यामि सावधानावधारय॥**

**अन्तः**

**दद्यात् शान्ताय शुद्धाय कौलिकाय महेश्वरि।**
**कालीभक्ताय शैवाय वैष्णवाय शिवाज्ञया॥**
**अद्वैतभावयुक्ताय महाकालप्रजापिने।**
**सुरास्त्रीवन्दकायापि शिवाबलिप्रदाय च॥**

**पुष्पिका**

इति कामाख्यातन्त्रे पार्वतीश्वरसंवादे नवमः पटलः समाप्तः॥

इति श्रीरसिकमोहनचट्टोपाध्यायकर्तृकसंकलिततन्त्रसारे विविधतन्त्रसंग्रहे कामाख्यातन्त्रं समाप्तम्॥

अस्मिंस्तन्त्रे पटलप्रतिपाद्या विषया अमी।

१. तन्त्रोपोद्धातवर्णनम्।
२. कामाख्यामन्त्रमहिम-तदुद्धार-ध्यानपूजादिर्णयः।
३. मन्त्रान्तरसाधन-तद्ध्यान-लतासाधननिरूपणम्।
४. गुरुतत्त्ववर्णन-दिव्य-वीर-पशुविशेषलक्षणम्।
५. पञ्चतत्त्वाराधनीयदेवीसाधनान्तरवर्णनम्।
६. शत्रुनाशनोच्चाटनादिसाधन-शुक्रादिशुद्धिवर्णनम्।
७. पूर्णाभिषेकविधान-तन्मन्त्र-कौलाधिकारगुर्वादिनिर्वचनम्।

८. मुक्तितत्त्वनिर्णयः।

९. कामाख्यातत्त्व-तन्त्रप्रशंसार्थवादकथनम्।

---

**१४३**

**१००३ क्रमदीपिका**

इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नूतनं नवीनावस्थाकं संपूर्णमष्टसु पटलेषु प्रपञ्चितसंदर्भणम्। पत्राणां संख्या ३२। प्रतिपृष्ठं श्रेणिसंख्या २४। प्रतिश्रेण्यक्षरसंख्या २०-२४। पत्रसंनिवेशः १३ × ९ $\frac{३}{८}$ ।

**आरम्भः**

ओं श्रीगणेशाय नमः॥

**कलात्तमायालवकान्तमूर्तिः**
**क्वणत्क्वणद्वेणुनिनादरम्यः।**
**श्रितो हृदि व्याकुलयंस्त्रिलोकीं**
**श्रियेऽस्तु गोपीजनवल्लभो वः॥ १ ॥**
**गुरुचरणसरोरुहद्वयोत्थान्-**
**महितरजः कणकान् ( प्रणम्य ) मूर्ध्ना।**
**गदितमिह विविच्य नारदाद्यै-**
**र्यजनविधिं कथयामि शार्ङ्गपाणेः॥ २ ॥**
**क्षितिसुरनृपविट्तुरीयजानां**
**मुनिवनवासिगृहस्थवर्णिनां च।**
**जपहुतयजनादिभिर्मनूनां**
**फलति हि कश्चन कस्यचित् कथंचित्॥ ३ ॥**
**सर्वेषु वर्णेषु तथाश्रमेषु**
**नारीषु नानाह्वयजन्मभेषु।**
**दाता फलानामभिवाञ्छितानां**
**द्रागेव गोपालकमन्त्र एषः ॥ ४ ॥**
**नूनमच्युतकटाक्षपातने**
**कारणं भवति भक्तिरञ्जसा।**
**तच्चतुष्टयफलाप्तये ततो**
**भक्तिमानधिकृतो हरौ गुरौ॥ ५॥**

**स्नातो निर्मलशुद्धसूक्ष्मवसनो धौताङ्घ्रिपाण्याननः**
**स्वाचान्तः सुपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः।**
**प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकं**
**स्वासीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः॥ ६॥**

**पुष्पिका**

इति क्रमदीपिकायां प्रथमः पटलः॥

**अन्तः**

**जगदिदमनुविद्धं येन यस्मिन् प्रसूते**
**यदनुततमजस्रं पाति चाधिश्रितो यः।**
**यदुरु महदुदर्चिर्यद्विधत्ते च गोपी**
**तममृतसुखबोधज्योतिषं नौमि कृष्णम्॥**

इति क्रमदीपिकायामष्टमः पटलः॥ समाप्ता॥ शुभमस्तु॥

अत्र तन्त्रे पटलेषु प्रतिपादितविषयाः-

१. देहशुद्धि-न्यास-पीठन्यासविधिः।
२. गोपालमन्त्रोद्धारतन्न्यासविधिः।
३. ध्यानादिपूजाविधानम्।
४. दीक्षाविधिवर्णनम्।
५. पुरश्चर्याविधानम्।
६. मन्त्रविनियोगप्रदर्शनम्।
७. काम्यप्रयोगान्तर-तन्मन्त्रभेदनिर्णयः।
८. वश्यादिप्रयोगविधानम्।

---

**१४४**

**१००६ गन्धर्वतन्त्रम्**

शिवप्रोक्तम्

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णं द्विचत्वारिंशति-पटलेषु विरचितसंदर्भणम्। पत्राणामत्र संख्या ११८। प्रतिपृष्ठं श्रेणिसंख्या २४। प्रतिश्रेण्यक्षरसंख्या २३। पत्रसंनिवेशः १३ × ९ $\frac{३}{८}$ ।

**आरम्भः**

ओं श्रीगणेशाय नमः॥ ओं नमः परदेवतायै ॥

**यं वदन्त्यमलात्मानः पुरुषं प्रकृतेः परम्।**
**चिद्रूपं परमानन्दं वन्दे तं विघ्ननायकम् ॥ १ ॥**
**भर्तारं गुणवृद्धिशून्यमचलं गत्वाभिसारक्रमाद्**
**दीव्यन्ती कुलवर्त्मनैव गुणवत्यानन्दमातन्वती।**
**शेते सुप्तभुजङ्गपोतकुटिला या मेरुमूलं गता**
**सूते यन्त्रशतानि तानि मुरजिन्मुख्यानि पायादसौ॥ २ ॥**
**विश्वामित्र इति ख्यातो नृपः परमधार्मिकः।**
**सिद्धिं दृष्ट्वा वसिष्ठस्य तपस्तेपे सुदुश्चरम्॥ ३ ॥**
**अप्राप्य तपसः सिद्धिमुदीचीं दिशमाविशत्।**
**गङ्गाद्वारसमासीनं मुनिं योगपरायणम् ॥ ४ ॥**
**दत्तात्रेयं महाभागमभिवाद्य कृताञ्जलिः।**
**उवाचेदं वचस्तस्मै विनयानतकन्धरः ॥ ५ ॥**

विश्वामित्र उवाच

**नाद्राक्षं सम्यगिष्ट्वापि क्रतुभिर्बहुदक्षिणैः।**
**सत्पात्रे सर्वदानानि कृत्वापि मुनिसत्तम ॥ ६ ॥**
**महाविद्यां प्रजप्याथ पुरस्क्रियापुरःसराम्।**
**भवाब्धेस्तरणोपायं तपस्तप्त्वा सुदुश्चरम्॥ ७ ॥**
**सर्वागमैकतत्त्वज्ञ ब्रह्मनिष्ठ तपोधन।**
**किं करिष्याम्यहं देव कुत्र यास्यामि तद्वद ॥ ८ ॥**

दत्तात्रेय उवाच

**मा विषीद नृपश्रेष्ठ सर्वथा त्वं स्थिरो भव।**
**यत् श्रुत्वाधिगतं पूर्वमस्माभिर्नन्दिकेश्वरात् ॥ ५ ॥**
**तदशेषं प्रवक्ष्यामि गुह्याद्गुह्यतरं परम्।**

**पुष्पिका**

इति श्रीगन्धर्वतन्त्रे प्रथमः पटलः ॥ १ ॥

**अन्तः**

**एवं विदित्वा परमात्मरूपं**

**गुहाशयं निष्कलमद्वितीयम्।**
**समस्तसाक्षिं सदसद्विहीनं**
**प्रयाति शुद्धं परमात्मरूपम्॥**

य एतत्तन्त्रं समधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति कृत्याकृत्यात् पूतो भवति अगम्यगमनात्पूतो भवति ॥

इति श्रीतन्त्रगन्धर्वे द्वाचत्वारिंशत्तमः पटलः समाप्तः॥ शुभमस्तु॥

अधः प्रदर्श्यन्ते पटलेषु प्रतिपादिता विषयाः।

१ तन्त्रस्य प्रस्ताविका ।
२ विद्याभेदानामुद्धारः।
३ पञ्चमीविद्योद्धारप्रयोगादिविधिः।
४ राजराजेश्वरीकवचम्।
५ यन्त्रोद्धाराद्यङ्गावरणार्चाक्रमः।
६ कर्मयोगादिक्रमप्रदर्शनम् ।
७ स्नानसंध्योपासादिविधिः।
८ यागधामार्चन-भूतशुद्ध्यादिविधानम्।
९ करशुद्ध्यादिमातृकान्यासः।
१० षोढान्यासक्रमवर्णनम्।
११ नित्यन्यासाद्यन्तर्यागविधिः।
१२ मानसार्चन-ध्यानयोगक्रमनिरूपणम्।
१३ बहिर्यागक्रमविशेषार्घविधिः।
१४ बहिर्यजनप्रकारप्रदर्शनम्।
१५ पूजोपचारवर्णनम्।
१६ उपचारविधिनिरूपणम्।
१७ प्रकटाप्रकटयोगिनीपूजनक्रमः।
१८ जपादिविधानम्।
१९ वटुकादिबलिविधिः।
२० शेषिकाविद्याप्रयोगक्रमः।
२१ पूजासंपूरणाद्युपायविधिः।
२२ समयाचारविधिः।
२३ कुमारीपूजनक्रमः।
२४ तत्पूजामहिमप्रयोगादिविधानम्।
२५ पुण्यपीठकथनाद्यापत्कालपूजादिविशेषः।

२६ गुरु-शिष्य-दीक्षालक्षणम्।
२७ दीक्षाविधानम् ।
२८ पुरश्चर्याविधिकथनम्।
२९ विद्यासंकेतनिर्णय: ।
३० त्रिकूटपृथक्साधनविधि: ।
३१ होमतद्द्रव्यप्रयोगविधानम्।
३२ मुद्राधारणविधिनिरूपणम्।
३३ चक्रराजप्रतिष्ठावर्णनम्।
३४ कुलाचारवर्णनम्।
३५ काम्यपूजाविधि: ।
३६ शक्त्यानयन-ज्ञानमयीपूजानिरूपणम्।
३७ शक्तिमाहात्म्य-देहसिद्धिवर्णनम्।
३८ शिवशक्तिलाभप्रदर्शनम्।
३९ शिवस्य देवीकृतज्ञानोपदेश: ।
४० शिवशक्तिमयज्ञान-कुलयागवर्णनम्।
४१ अनुत्तरज्ञानप्रक्रियानिरूपणम्।
४२ तत्त्वज्ञानोपदेशनम्।

---

**९२**

**६४९ घटयोग: ।**

घेरण्डसंगृहीत:

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकम् असंपूर्णं नवीनं नवावस्थाकम्। पत्रसंख्या ९ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४ । संनिवेश: १३ १/२ × ९ ३/८ ।

**आरम्भ:**

श्रीगणेशाय नम: ओं

**आदीश्वराय प्रणमामि तस्मै येनोपदिष्टा हठयोगविद्या ।**
**विराजते प्रोन्नतराजयोगमारोढुमिच्छन्विधिरोहिणीव ॥ १ ॥**
**एकदा चण्डकापालिर्गत्वा घेरण्डकुट्टिमम्।**
**प्रणम्य विनयाद्भक्त्या घेरण्डं परिपृच्छति ॥ २ ॥**

श्रीचण्डकापालिक उवाच

**घटस्थयोगं योगेश तत्त्वज्ञानस्य कारणम्।**
**इदानीं श्रोतुमिच्छामि योगेश्वर वद प्रभो ॥ ३ ॥**

श्रीघेरण्ड उवाच

साधु साधु महाबाहो यन्मां त्वं परिपृच्छसि।
कथयामि हि ते वत्स सावधानोऽवधारय ॥ ४ ॥
नास्ति मायासमं पाशं नास्ति योगात्परं बलम्।
नास्ति ज्ञानात्परो बन्धुर्नाहंकारात्परो रिपुः॥ ५॥
अभ्यासात् कादिवर्णानि यथा शास्त्राणि बोधयेत्।
तथा योगं समासाद्य तत्त्वज्ञानं च लभ्यते॥ ६ ॥
सुकृतैर्दुष्कृतैः कार्यैर्जायते प्राणिनां घटः।
घटादुत्पद्यते कर्म घटयन्त्रं यथा भ्रमेत् ॥ ७ ॥
ऊर्ध्वाधो भ्रमते यद्वद् घटियन्त्रं गवां वशात्।
तद्वत्कर्मवशाज्जीवो भ्रमते जन्ममृत्युभिः॥ ८ ॥
आमकुम्भमिवाम्भःस्थो जीर्यमाणः सदा घटः।
योगानलेन संदह्य घटशुद्धिं समाचरेत्॥ ९॥
प्राणापाननादबिन्दुजीवात्मपरमात्मनः।
मिलित्वा घटते यस्मात्तत्तस्माद् घट उच्यते ॥ १० ॥

---

## १४८

## १०२१ चीनाचारक्रमः।

शिवप्रोक्तः

हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नूतनं नवीनावस्थाकं समग्रं षट्सु पटलेषु विरचितसंदर्भणोपन्यासम्। पत्रसंख्या ७ । प्रतिपृष्ठं श्रेणिसंख्या २४-२६ । प्रतिश्रेण्यक्षरसंख्या २४ । पत्रसंनिवेशः १२ $\frac{५}{८}$ × ९ $\frac{१}{२}$ ।

**आरम्भः**

ॐ नमः पार्वत्यै॥ श्रीदेव्युवाच

महाचीनक्रमाचारः सूचितो न प्रकाशितः।
इदानीं श्रोतुमिच्छामि कथयस्व महेश्वर ॥
इति पृष्टः पुरा देव्या कैलासशिखरे हरः।
चिन्तयामास मनसा किंचिदामीलितेक्षणः॥
इयमुत्कण्ठितां भूयोभूयः प्रेरयति प्रिया।
चीनाचारक्रमं वक्तुं स्वप्रकाशं कथं मया॥

**अतिगुह्यतरं सोऽयमाचारः सिद्धिदायकः।**
**स्त्रीणां चपलया बुद्ध्या कथं गोप्तुं हि शक्यते॥**
**इति संचिन्त्य मनसा पुनराह महेश्वरी।**
**चीनाचारक्रमाचारं ब्रूहि मे परमेश्वर॥**

श्रीशिव उवाच

**अलं यत्नैरलं यत्नैरलं यत्नैर्महेश्वरि।**
**चीनाचारक्रमं श्रोतुं विरता भव पार्वति॥**
**सर्वथा परमद्वारो न प्रकाश्यः कदाचन।**

## पुष्पिका

इति महाचीनाचारसारतन्त्रे सर्वाचारसारोत्तमोत्तमे महाचीनाचाक्रमे प्रथमः पटलः ॥ १ ॥

## अन्तः

**देया विद्यार्थिने विद्या व्याधितेभ्यश्च औषधम् ।**
**देयं क्षुधार्थिने अन्नं त्रयं स्वर्गस्य लक्षणम् ॥**

इति महाचीनाचारसारतन्त्रे सर्वाचारसारोत्तमोत्तमे महाचीनाचारक्रमः समाप्तः॥

अस्मिंस्तन्त्रे प्रतिपटलमुद्दिष्टविषया इमे ।

१ तन्त्रप्रस्तावनायां वसिष्ठमुनेर्देवीमाराधयतः सिद्ध्यलाभे शप्तुमुद्यतस्य चीनाचारक्रमेणाराधनाज्ञाकथनम् ।
२ चीनाचारोपदेशपूर्वं वसिष्ठमुनेस्तारादेव्या आराधनवर्णनम्।
३ चीनाचारे पीठपूजन-सुराशापविमोचननिर्णयः
४ कुलद्रव्यनिर्माण-तत्सेवनादिनिरूपणम्।
५ समयाष्टक-कुलाचारशङ्कापनोदनवृत्त-ग्रन्थफलोपसंहारवर्णनम्।
६ शक्तिपूजापुष्पप्रकाशनम्।

---

**१५३**

## १०२८ तोडलतन्त्रम् ।

शिवोक्तम्

इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नवीनमजरदवस्थाकं संपूर्णं दशसूल्लासेषु विरचितसंदर्भणोपन्यासम्। पत्राणां संख्या १२ । प्रतिपृष्ठं श्रेणिसंख्या २४। प्रतिश्रेण्यक्षरसंख्या २४-२६। पत्रसंनिवेशः १२ $\frac{५}{८}$ × ९ $\frac{१}{२}$ ।

**आरम्भः**

ॐ श्रीदेव्युवाच

**ब्रूहि मे जगतां नाथ सर्वविद्यामय प्रभो।**
**महाविद्यासु सर्वासु पूज्यासु भुवनत्रये॥**
**एतासां दक्षिणे भागे नानारूपः पिनाकधृक्।**
**पृथक् पृथक् महादेव कथयस्व मयि प्रभो॥**

श्रीशिव उवाच

**शृणु चार्वङ्गि सुभगे कालिकायाश्च भैरवम् ।**
**महाकालं दक्षिणाया दक्षभागे प्रपूजयेत्॥**

**अन्तः**

**तारादेवी मीनरूपा बगला कूर्ममूर्तिका ।**
**धूमावती वराहः स्यात् छिन्नमस्ता नृसिंहिका॥**

**...................................................................**

**स्वयं भगवती काली कृष्णमूर्तिः समुद्भवा।**
**इति ते कथितं देव्यवतारं दशमेव हि॥**
**एतासां पूजनाद्देवि महादेवसमो भवेत्।**
**आसां ध्यानादिकं सर्वं कथितं मे पुरस्तव॥**

**पुष्पिका**

इति श्रीतोडलतन्त्रे पार्वतीशिवसंवादे दशमोल्लासः॥ संपूर्णः॥ ॥

अस्मिन् ग्रन्थे पटलोद्दिष्टा विषया अमी -

१ विद्यानां दक्षतः पूज्यदेवताकीर्तनम्।
२ लघु-ब्रह्माण्ड-तीर्थमुद्रासननिरूपणम्।
३ महामुद्रा-कालिकामन्त्रोद्धार-तारामन्त्रादि-स्नानसंध्या-पूजापद्धति-संक्षेपार्चाप्रदर्शनम्।
४ तारापूजाक्रमविधानम्।
५ प्रासादमन्त्रोद्धार-पार्थिवशिवार्चनविधानवर्णनम्।
६ कालीमन्त्रवासना-पुरश्चरण-मन्त्रचैतन्य-तारामन्त्रवासना-माहात्म्यादिप्रकाशनम्।
७ मूलाधारस्थद्वीपाब्ध्यादिकीर्तन-षट्चक्रदेवता-महापीठ-पातालवर्णनम्।
८ शारीरनाडीमान-मूलाधारपद्मतन्मानादिनिर्णयः।
९ नवार्णवासना-दीर्घायुःसाधन-षण्मालाजपफल-भूतकात्यायनीमन्त्रोद्धार-ध्यानादि-प्रकाशनम्।
१० काकचञ्चुमुद्रा-दशावतारदेवीनिर्णयः।

## १६१

## १०४३ देवीरहस्यम्।

भैरवप्रोक्तम्

पुस्तकमेतत् हस्तलिखितं देवनागराक्षरलिपिकं नातिप्राचीनं नूतनावस्थाकं पञ्चचत्वा-रिंशत्पटलपर्यन्तम् असंपूर्णम् उत्तरार्धं दुर्गापञ्चाङ्गेन विकलम्। पत्रसंख्या २१७। श्रेणयः १३ । अक्षरसंख्या २०। संनिवेशः ९ $\frac{3}{८}$ × ९ $\frac{3}{८}$ ।

**आरम्भः**

ओं श्रीगणेशाय नमः ओं नमस्त्रिपुरसुन्दर्यै श्रीर्नमः ओं श्रीभैरव उवाच ओं

**अधुना देवि वक्ष्यामि रहस्यं परमाद्भुतम्।**
**यन्न सर्वेषु तन्त्रेषु यामलादिषु भाषितम्॥**
**परादेवीरहस्याख्यं तन्त्रं मन्त्रार्थविग्रहम्।**
**तत्त्वं श्रीषोडशाक्षर्याः सर्वस्वं मम पार्वति॥**
**अप्रकाश्यमदातव्यं परमार्थफलप्रदम्।**
**भोगापवर्गदं लोके साधकानां सुखावहम्॥**

**पुष्पिका**

इति श्रीरुद्रयामले तन्त्रे देवीरहस्ये परमार्थदीपिकायां यन्त्रशोधनविधिर्नाम पञ्चविंशः पटलः २५ इति पूर्वार्धम् शुभम्॥

**अन्तः**

**इतीदं परमं स्तोत्रं महामृत्युंजयप्रदम्।**
**पठेद्वा पाठयेन्नित्यं सर्वस्वं देवदुर्लभम्॥**

..............................................................

**चतुष्पथेऽर्धरात्रे तु ब्राह्मे वापि मुहूर्तके।**
**पठित्वा कौलिको देवि भवेद्भैरवसंनिभः॥**
**इतीदं मम सर्वस्वं रहस्यं परमाद्भुतम्।**
**यस्य कस्य न देष्टव्यमित्याज्ञा पारमेश्वरी॥**

इति श्रीदेवीरहस्ये महामृत्युंजयस्तोत्राख्यानं नाम पञ्चचत्वारिंशः पटलः ४५ समाप्तमिदं मृत्युञ्जयपञ्चाङ्गम् । अतः परं दुर्गापञ्चाङ्गम्॥

अस्मिन् ग्रन्थे पटलेषु प्रतिपाद्यविषया अधः प्रदर्श्यन्ते।

१ दीक्षाविधानम्।
२ शाक्तमन्त्राणामुद्धारविधिः।
३ शैवमन्त्रोद्धारविधिः।
४ वैष्णवमन्त्रोद्धारक्रमः।
५ शाक्तमन्त्राणामुत्कीलनविधिः।
६ शैवशाक्तवैष्णवमन्त्राणां संजीवनविधिः।
७ उक्तमन्त्राणां शापहारिणीविद्याक्रमः।
८ पारायणजपविधिः।
९ प्रोक्तमन्त्राणां संपुटविधिः।
१० पुरश्चर्याविधिः।
११ पुरश्चर्याहोमविधानम्।
१२ यन्त्रोद्धारविधिवर्णनम्।
१३ यन्त्रधारणविधिः।
१४ ऋषिच्छन्दोनिर्णयविधिः।
१५ श्मशानार्चनविधिः।
१६ भैरवसाधनविधानम्।
१७ शोधनविधानम्।
१८ शोधनपद्धतिवर्णनम्।
१९ सुरोत्पत्तिविवरणम्।
२० पात्रवन्दनविधिः।
२१ शान्तिस्तोत्रवीरवन्दनाख्यानम्।
२२ सुरादिशुद्धिविधानम्।
२३ शक्तिशोधनविधिः।
२४ मालाशोधनविधिः।
२५ यन्त्रशोधनक्रमः।
२६ महागणपतिमन्त्रोद्धारविधिः।
२७ तत्पूजापद्धतिवर्णनम्।
२८ गणपतिकवचम्।
२९ गणपतिनामसहस्रम्।
३० गणपतिस्तोत्रम्।
३१ वज्रपञ्जरकवचम्।
३२ सूर्यस्तोत्रम्।
३३ सूर्यमन्त्रयन्त्रोद्धारपटलः।
३४ सूर्यपूजापद्धतिः।
३५ सूर्यनामसहस्रम्।
३६ लक्ष्मीनारायणमन्त्राद्युद्धारः।
३७ तत्पूजापद्धतिवर्णनम्।
३८ तत्कवचम्।
३९ तन्नामसहस्रम्।
४० तन्मन्त्रस्तोत्रम्।
४१ मृत्युञ्जयमन्त्राद्युद्धारः।
४२ तत्पूजापद्धतिवर्णनम्।
४३ मृत्युञ्जयकवचम्।
४४ मृत्युञ्जयनामसहस्रम्।
४५ मृत्युञ्जयस्तवः।

५

## ११२ बालबोधिनी वृत्तिः।

जगद्धरभट्टविरचिता

इदं भूर्जपत्रात्मकं हस्तलिखितं पुस्तकं शारदाक्षरलिपिकम् अतिजरदवस्थम् अतीवप्राचीनम्। आदितः ६३ पत्राणि विनष्टानि, अन्तेऽपि विनष्टाल्पभागशेषकम्। प्रायशोऽखण्डितात्रुटित-विद्यमानग्रन्थभागस्य पत्रसंख्या द्विशतोत्तरा। प्रतिपृष्ठं श्रेणिसंख्या १९। प्रतिश्रेण्यक्षरसंख्या १९-२४। ग्रन्थसंनिवेशः १० $\frac{३}{८}$ × ८ $\frac{१}{२}$ ।

**आरम्भः**

...................................................... परमश्चासौ...........रिति कर्मधारयः॥ भ्रूधातुवत्॥ भ्रूशब्दो धातुवद्भवति। स्वरे परे। यथा धातोरुवादेश उक्तः तथा भ्रूशब्दस्यापि भवतीत्यर्थः। भ्रुवौ भ्रुवः स्वरे इति किम् भ्रूभ्यां भ्रूभिः॥ स्त्री च॥ स्त्रीशब्दो धातुवद्भवति स्वरे परे॥

**पुष्पिका**

इति पण्डितजगद्धरविरचितायां बालबोधिन्यां नामप्रकरणे युष्मत्पादस्तृतीयः॥

इति पण्डितभट्टजगद्धरविरचितायां बालबोधिन्यां कृतौ कृत्प्रकरणे कर्मणि पादस्तृतीयः॥

**अन्तः**

चेक्रीयितान्तानां यजिजपिदन्शिवदाम् यज देवता. । जप मानसे । दन्श दशने । वद व्यक्तायां वाचि। एषां चेक्रीयितान्तानां तच्छीलादौ कर्तरि ऊक-प्रत्ययो भवति अत्यर्थं यजति तच्छीलः यायजूकः गर्हितं जपति तच्छीलः जञ्जपूकः........................................................

---

१६६

## १०५८ बृहन्नीलतन्त्रम्।

महाकालभैरवप्रोक्तम्

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णं नवसंख्येषु पटलेषु प्रारब्धसंदर्भणम्। पत्रसंख्या ४६ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २२ । पत्रसंनिवेशः १३ × ९ $\frac{३}{८}$ ।

**आरम्भः**

ओं श्रीगणेशाय नमः॥ ओं नमस्तारायै॥

**कैलासशिखरासीनं भैरवं कालसंज्ञितम्।**
**प्रोवाच सादरं देवी तस्य वक्षःसमाश्रिता ॥ १ ॥**
**पुरा प्रतिश्रुतं देव कालीतन्त्रप्रकाशने।**
**नीलतन्त्रप्रकाशाय तद्वदस्व सदाशिव ॥ २ ॥**
**यस्य विज्ञानमात्रेण विजयी भुवि जायते।**
**यज्ज्ञात्वा साधकाः सर्वे विचरन्ति यथा तथा ॥ ३ ॥**
**यस्य विज्ञानमात्रेण कविता चित्तमोदिनी।**
**जायते च महादेव तत्त्वं तत्कथयस्व मे ॥ ४ ॥**

श्रीमहाकालभैरव उवाच

**शृणु साध्वि वरारोहे सर्वार्थस्य प्रदायिनि।**
**तत्त्वं तत्कथयिष्यामि तव स्नेहाद्गणाधिपे॥ ५॥**

**पुष्पिका**

इति श्रीबृहन्नीलतन्त्रे प्रथमः पटलः ॥ १ ॥

**अन्तः**

**ब्रह्माणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम्।**
**महाशवाः प्रशस्ताः स्युः प्रधानं साधयेत् प्रिये ॥**
**श्मशानेऽपि पुरश्चर्या कथिता भुवि दुर्लभा।**
**श्मशानसाधनं देवि परं साधनमुत्तमम्॥**
**श्मशानस्थो यदि भवेज्जपेन्मन्त्रमनन्यधीः।**
**स सर्वसाधनं कृत्वा देवीलोके महीयते॥**

इति श्रीबृहन्नीलतन्त्रे भैरवपार्वतीसंवादे नवमः पटलः॥

अस्मिन् ग्रन्थे पटलोद्दिष्टविषया निम्नप्रदर्शिताः।

१ मूलमन्त्रोद्धारपूर्वं संध्याविधिः।
२ षोडशोपचारपूजा-स्तोत्रादिनिरूपणम्।
३ दीक्षाविधिः
४ पुरश्चर्याविधिप्रदर्शनम्।
५ नैमित्तिकार्चन-पीठतदीश्वरीवर्णनम्।

६ कुलपूजाशाक्ताचारविधिः।
७ निग्रहादिप्रयोग-कुमारीपूजाक्रमः।
८ यन्त्रमन्त्रान्तरप्रयोग-तत्संस्कारादिविधिः।
९ वीरसाधनविधानम्।

---

## ११

## १९२ भक्तिरसामृतसिन्धुः।

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णं प्राचीनात् श्रीरघुनाथमन्दिरपुस्तकालयस्थात् संवत् विक्रमे १४६३ विरचितात् ग्रंथादवतारितम् संवत् वि० १९४५। चतुर्भिः पूर्वादिविभागैः सलहरिभिर्विरचितसंदर्भोपन्यासम्। पत्राणां संख्या १६०। प्रतिपृष्ठं श्रेणिसंख्या ९। प्रतिश्रेण्यक्षरसंख्या ३२-३४। पत्रसंनिवेशः १२ १/८ × ७।

### आरम्भः

ओं श्रीकृष्णाय नमः ओं

**अखिलरसामृतमूर्तिः प्रसृमररुद्धतकापालिः (?)।**
**कलितश्यामाललितो राधाप्रेयान् विधुर्जयति॥ १॥**
**हृदि यस्य प्रेरणया प्रवर्तितोऽहं वराकरूपोऽपि।**
**तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥ २ ॥**
**विश्राममन्दिरतया तस्य सनातनतनोर्मदीशस्य।**
**भक्तिरसामृतसिन्धुर्भवतु सदायं प्रमोदाय ॥ ३॥**
**भक्तिरसामृतसिन्धौ चरतः परिभूतकालजालभियः।**
**भक्तमकरानशीलितमुक्तिनदीकान्नभस्यामि ॥ ४॥**
**मीमांसकवडवाग्नेः कठिनामपि कुण्ठयन्नसौ जिह्वाम्।**
**स्फुरतु सनातनः सुचिरं नवभक्तिरसामृताम्भोधिः॥ ५॥**
**भक्तिरसस्य प्रस्तुतिरखिलजगन्मङ्गलप्रसङ्गस्य।**
**अज्ञेनापि मयास्य क्रियते सुहृदां प्रमोदाय ॥ ६॥**
**एतस्य भगवद्भक्तिरसामृतपयोनिधेः।**
**चत्वारः खलु वक्ष्यन्ते भागाः पूर्वादयः क्रमात्॥ ७॥**

### पुष्पिका

इति श्रीभक्तिरसामृतसिन्धौ रसोपयोगिस्थायिभावोपपादनो नाम पूर्वो विभागः॥

**अन्त:**

तथा हि

**भावा: सर्वे तदाभासा रसाभासाश्च केचन।**
**अमी प्रोक्ता रसाभिज्ञै: सर्वेऽपि रसनाद्रसा: ॥ ४१ ॥**
**भारत्याद्याश्चतस्रस्तु रसावस्थानसूचिका:।**
**वृत्तयो नाट्यमातृत्वादुक्ता नाटकलक्षणे ॥ ४२ ॥**

इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरसादिनिरूपणे रसाभासलहरी नवमी ॥ ९ ॥

**ग्रन्थस्य गौरवभयादस्या भक्तिरसश्रिय:।**
**समाहृति: समासेन मया सेयं विनिर्मिता ॥ १ ॥**
**गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी।**
**तुष्यतु सनात्मास्मिन्नुत्तरभागे रसामृताब्धे: ॥ २ ॥**

इति श्रीभक्तिरसामृतसिन्धौ गौणभक्तिरसादिनिरूपणं नाम चतुर्थोत्तरविभाग: ॥ समाप्तोऽयं भक्तिरसामृतसिन्धुरिति ॥ ॥ शुभम् ॥ ये पुस्तक संवत् १४६३ का जेडा पुस्तक श्रीरघुनाथजीके मंदिर मै था उसका उतारा है संवत् १९४५ कार्तिक प्र० २५ लिखी गया लिख्या बालकराम ने॥

---

**२७**

**३४२ महार्णवनिबन्ध:।**

मान्धातृनृपकारित:

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नवावस्थम् असंपूर्णम् । पत्रसंख्या ३९२ । प्रतिपृष्ठं श्रेणिसंख्या १६ । प्रतिश्रेण्यक्षरसंख्या १६ । पत्रसंनिवेश: १४ $\frac{१}{८}$ × १०।

**आरम्भ:**

ओं श्रीगणेशाय नम: ओं नम: सरस्वत्यै ओं

**नम: सकलकल्याणभाजनाय पिनाकिने।**
**नमो लक्ष्मीनिवासाय देवतायै गिरां नम: ॥**
**प्रवालाद्रिप्रस्थद्युतिनिचयपर्यायवपुषे**
**नमो विघ्नश्रेणीविघटनपटिष्ठाय महसे।**
**जगत्प्रादुर्भावस्थितिलयनिरायासरचना-**
**विनोदासक्ताय प्रणतिफलसिद्धिप्रतिभुवे ॥**
**यदिन्दिरानाथपुरन्दराद्यै-**
**राराधितं भक्तिभरानताङ्गै:।**

श्रीचण्डिकायाश्चरणद्वयं तत्
स्वाभीष्टसिद्ध्यै भवतात्सुखं नः ॥
प्रकृष्टचलकुण्डलस्तबकवृष्टगण्डस्थलं
महार्हमणिमेखलं मरकताङ्कुरश्यामलम्।
करोतु कमलामलं कलितपञ्चषाब्दक्रमं
महः किमपि मोहनं कपटशैशवं कैशवम् ॥
कान्ते कृतागसि रुषा परुषं ब्रुवाणा।
कुण्ठीकृताथ रसभावनियन्त्रणेन।
मौनेन मानमधिगच्छति या ददातु
सा पार्वती हरविभक्ततनुः श्रियं वः॥
आसीदसीमगुण एककुलाम्बुराशा-
वुद्यत्प्रतापशुभकीर्तिघनप्रकाशः।
लोकैः सदा हृदि धृतो गुणसंनिविष्टः
श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥
तस्यात्मजो भरहपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमिद्धकीर्तिः।
दानेन यः सुकृतिनां क्षिपति स्म दैन्यं
सैन्यं च वैन्यसदृशः प्रतिभूपतीनाम्॥
सुतोऽस्य जातः सुकृतोन्नतस्य
न तस्य कश्चित् सदृशो बभूव।
यमाह्वयत् सम्यगवेक्ष्य तातो
नाम्ना हरिश्चन्द्र इति प्रतीतम् ॥
तस्यात्मजोऽभूदतुलप्रतापः
साधारणो भूमिपतिर्वदान्यः।
अभूतपूर्वां जगतीश्वराणा-
मजीगमद्यो जगति स्वकीर्तिम् ॥
बन्धच्छिदा विषदकीर्तिमिहान्वितार्थां
कृत्वा तथैव च परत्र विधातुमिच्छुः।
कीनाशपाशचयबन्धविमोचनार्थं
तीर्थत्रयीकरविमुक्तिमचीकरद्यः ॥
तस्यात्मजः श्रीमदनेन नाम्ना

धाम्ना च रूपेण च संगतार्थः।
रोषारुणे चक्षुषि यद्विपक्षो
नितान्तकान्तारसमाश्रितोऽभूत्॥
यः कूपानारामान् धर्मायतनानि सन्निबन्धांश्च।
कृत्वा स्वकीर्तिमेकामदीदृशन्मूर्तिभेदेन॥
परिशीलयता कलाकलापं
विदधानेन च भूरिशः प्रबन्धान्।
मदनेन महीभृताथ येन
प्रथिता नूतनभोजराजकीर्तिः॥
पुत्रेषु सत्स्वपि कलाकुशलेषु पुत्रौ
तस्माज्जगत्त्रयविसृत्वरकीर्तिपूरौ।
जातौ प्रियावतितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणैर्विनीतौ॥
उदारशीलौ सुमनोविकाश-
मनोज्ञवृन्दावनकेलिलोलौ।
यशोदयावेष्टितमङ्गलाङ्गौ
यौ रामकृष्णाविव संप्रतीतौ॥
यच्चैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमपरः श्रितसद्गुणोऽपि।
दानं निदानमखिलार्थिजनार्थसिद्धेः
कीर्तिर्दिगन्तविरता च यतस्तदीया॥
अप्रतिमल्लः पृथ्व्यां पृथ्वीमल्लस्तयोरभूज्ज्येष्ठः।
अपरो मान्धातृगुणैर्मान्धाता गीयते जगति॥
सोऽयं सुकृतविधाता रिपुजेता संतनोति मान्धाता।
विद्वन्मुखेन मतिमान् सत्कृतिं महार्णवं नाम॥
श्रुतिस्मृतिपुराणानि समालोच्य यथामति।
विरच्यते समासेन निबन्धोऽयं महार्णवः॥

तत्र तावद्वक्ष्यमाणसकलकर्मोपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेरवश्यकर्तव्यता प्रतिपाद्यते । तद्यथा ‘ ब्रह्महा क्षयरोगी स्यात् ’ इत्यादि रोगनिदानकथनात् निदानोच्छेदेन च व्याधिनिवृत्तेरवगतत्वात् तन्निदानोच्छेदाय क्षयित्वादिलक्षणरोगमुक्तेर्द्वादशवार्षिकादिप्रायश्चित्त-व्याधिप्रतिकृतिदानादि कर्तव्यम्।

**पुष्पिका**

**महार्णवाख्ये महिते प्रबन्धे**
**मान्धातृनाम्नो मदनात्मजस्य।**
**सत्कर्मरत्नौघनिधानमाद्य-**
**स्तुङ्गस्तरङ्गोऽयमगादगाधः॥**

**अन्तः**

ब्राह्मणोद्वाहनं चैव कर्तव्यं तेन शुद्ध्यतीति ब्राह्मणोद्वाहनस्यैव पापविमुक्तिहेतुत्वाभिध। नादेतत् स्वतन्त्रतया निष्कृतिः तेन शुद्ध्यतीति काकाक्षिवदुभयत्र संबध्यते अतः श्रवणं हरिवंशस्य..................॥

---

**१६८**

**१०६८ मातृकाभेदतन्त्रम्।**

शिवोक्तम्

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नवावस्थाकं संपूर्णं षोडशभिः पटलैः कृतसंदर्भविभागम् । पत्रसंख्या १९ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४ । पत्रसंनिवेशः १२ ५/८ × ९ १/४ ।

**आरम्भः**

ओं नमो( ?) श्रीगणेशाय नमः ओं नमो दुर्गायै
**कैलासशिखरे रम्ये नानारत्नोपशोभिते।**
**पप्रच्छ परया भक्त्या भैरवं परमेश्वरम्॥**
चण्डिकोवाच
**त्रिपुरापूजनं नाथ स्वर्णरत्नैर्विभूषणैः।**
**कलिकाले स्वर्णरत्नं तप्तभावं तथा मणिः॥**
**केनोपायेन देवेश स्वर्णरत्नादि लभ्यते।**
**तद्वदस्व विशेषेण यथा रत्नादिकं भवेत्॥**

**अन्तः**

**निषक्तमणिपादुकानियमिताघकोलाहलं**
**स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम्।**

**परामृतसरोरुहोदितसरोजमद्रोचितं**
**भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम्॥**
**पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम्।**
**षडाम्नायदलोपेतं प्रपञ्चे चातिदुर्लभम्॥**

## पुष्पिका

इति मातृकाभेदतन्त्रे सर्वतन्त्रोत्तमोत्तमे पार्वतीपरमेश्वरसंवादे श्रीशिववक्त्राद्विनिर्गतं श्रीमद्गुरुपादुकास्तोत्रं (षोडशः पटलः) समाप्तम् ॥ शुभमस्तु शुभम् ॥

अस्मिंस्तन्त्रे पटलोद्दिष्टा विषया अमी

१ रौप्यनिर्माण-मद्यनिर्गन्धीकरणविधानम्।
२ पुत्रोत्पत्तिस्थित्यादिकथनम्।
३ भोजनविधान-होमकुण्ड-मद्यपानपुण्यविधिः।
४ मद्य-महाशङ्खप्रशंसाकीर्तनम्।
५ पारदभस्मीकरण-तत्साध्यादिनिरूपणम्।
६ आपन्मोचन-ग्रहणमाहात्म्य-चामुण्डाराधनविधानम्।
७ त्रिपुरसुन्दरीविधाने गुरुस्तोत्र-कवच-संध्याध्यान-लिङ्गार्चावर्णनम्।
८ लिङ्गरूपवर्णन-पारदलिङ्गविधानम्।
९ पारदभस्मीकरण-प्रकारान्तर-कथनम्।
१० गुरुमन्त्रदेवतैक्यविमर्श-पशुप्रदाननिरूपणम्।
११ प्रासादादिसमर्पण-यज्ञसूत्रधारणविधिः।
१२ पूजाधारवर्णनम्।
१३ शिवलिङ्गपूजाफल-मन्त्रदोषसंस्कारादिक्रमः।
१४ मालाजप-ग्रन्थिच्छेदनादिदोषनिवारणवर्णनम्।
१५ त्रिविध-भोग-दिव्यवीर-वीरशक्तिलक्षण-गुरुपूजादिनिर्णयः।
१६ पादुकापञ्चकस्तोत्रम् ।

---

**१०३**

**७३९ रणवीरविजयः।**

विश्वेश्वररचितः

इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नवीनं नवावस्थाकं मध्ये सार्धशतपत्राणां विनष्टत्वादसंपूर्णम् । पत्रसंख्या ५८९ । प्रतिपृष्ठं श्रेणिसंख्या १५-१६ । प्रतिश्रेण्यक्षरसंख्या १३ । संनिवेशः १२ $\frac{३}{८}$ × ९ $\frac{१}{२}$ ।

**आरम्भः**

ओं श्रीगणेशाय नमः

श्रीगणेशं नमस्कृत्य वाञ्छितार्थफलप्रदम्।
वार्णी दिवाकरं चापि देवकृष्णाभिधं गुरुम् ॥ १ ॥
यस्य स्मरणमात्रेण वीरा युद्धं तरन्ति तम् ।
सासितूणधनुर्बाणपाणिं वन्दे रघूत्तमम् ॥ २ ॥
गृहीत्वा राजविजयान्मुकुन्दविजयात् तथा ।
शत्रोः पराभवाख्याच्च सारं युद्धजयार्णवात् ॥ ३ ॥
नरपत्यादिकेभ्योऽथ गृहीत्वा सारमुत्तमम् ।
भाषाव्याख्यानसहितं सुबोधं युद्धसंमतम् ॥ ४ ॥
विश्वेश्वरः प्रकुरुते रणवीरनृपाज्ञया ।
रणवीराख्यविजयं नृपाणां हितकाम्यया ॥ ५ ॥
बहुधा विदधे सदाशिवोऽत्र
    स्वरतन्त्राणि तदेकवाक्यतां तु ।
भगवानयमेव वेद सम्यग्
    गुरुमार्गानुगतोऽपरस्तु लोकः ॥ ६ ॥
संगृहीतं यदत्रास्ति तावदेव विचार्थ यः।
युद्धाय यतते राजा सोऽल्पोऽपि जयति ध्रुवम् ॥ ७॥
मत्तद्विपा वायुजवास्तुरङ्गाः
    सहस्रशः सन्तु पदातयश्च ।
स्वरोदयाढ्यः खलु यस्तु युद्धे
    विश्वम्भरेशो विजयी भवेत्सः ॥ ८॥

**अन्तः**

विप्रचित्तिं च दैत्येयं दनोः पुत्रांश्च सर्वशः।
प्रह्लादं च निहत्याजौ ततो देवाधिपोऽभवम् ॥ ९९॥

भीष्म उवाच

इत्येतच्छक्रवचनं निशम्य प्रतिगृह्य च ।
योधानामात्मनः सिद्धिमम्बरीषोऽभिपन्नवान् ॥ १०० ॥

इति युद्धमाहात्म्यम्॥

## पुष्पिका

इति श्रीमहाराजाधिराजरणवीरसिंहाज्ञया विश्वेश्वरेण संगृहीते रणवीरविजये युद्धमाहात्म्यप्रकरणं समाप्तम्।

अस्मिन् ग्रन्थे प्रतिपादिता अमी विषयाः प्रकरणेषु ।

१ मङ्गलाचरणं स्वरप्रशंसा स्वरचक्रतद्भेदकथनम्, द्वन्द्वयुद्धे जयपराजयज्ञानचक्रादिवर्णनम्, सूर्यचन्द्रघात-यायि-स्थायिजयपराजय-वायुराहुबल-वारवर्जनीय-प्रहरार्ध-दिग्वर्जनीयकालपाशज्ञानम्, कालहोरायुद्धप्रहाराङ्गज्ञानम्, मात्रादिक्स्वामिबलनिरूपणम्।

२ जयाजयज्ञानार्थकुलाकुलगणचक्र-युद्धत्याज्यनक्षत्र-यात्रावाहन-योगिनीविचारः, दिक्शूलसूर्यकालानलचक्र-तत्फलविचारः, योगपञ्चकादिकथनम्, दशाङ्गराहुचक्रतत्फलर्वणनम्, .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... .... ....।

३ .... .... .... .... .... .... पुरभङ्ग-जलदुर्ग-स्थलदुर्ग-गिरिदुर्गादिभङ्गविधानम्, असाध्यदुर्गभञ्जनोपायकथनम्।

कोटचक्रप्रकार-गजचक्रतच्छुभाशुभवर्णनम्, अश्वचक्र-रथचक्र-कुन्तचक्र-खड्गचक्र-छुरिकाचक्र-चापचक्रतत्फलवर्णनम् ।

प्रहारनिर्णायार्थशनिचक्रतत्फलवचनम्, सेवाचक्र-नरचक्र-पक्षिचक्र-वर्गचक्र-आय-चक्र-विरिञ्चिचक्र-सप्तशलाकाचक्र-वक्रचन्द्रचक्र-जाग्रच्चन्द्रचक्र-सुप्तचन्द्रचक्र-बाह्यसुप्तचन्द्र-चक्र-भास्करचक्र-मातृकाचक्र-विजयचक्र-अहिचक्रतत्फलविवरणम्, वृष्टिज्ञानार्थसप्तनाडीचक्र-सूर्यचक्र-भौमजीवशुकचक्रतत्फलवचनम्।

मृगयाविचारः, नक्षत्र-जाति-ताराविचारः, व्यूहभेदरचनातत्फलकीर्तनम्, वाद्यविधि-विषाणचक्र-भेरीवाद्य-गह्वरवाद्य-युगवाद्य-ताम्रीपर्वी-मर्दनीवाद्य-वीरवाद्यरचना-तत्फलकथ-नम्, पटहादिचक्र-डमरुचक्र-शङ्खचक्र-शृङ्गचक्र-वाद्यबलनियमनिरूपणम्।

मूत्रादिस्वरचक्र-तिथिनक्षत्रभावकाल-चातुरङ्गसूचन-सेनाचक्रतत्फलनिर्णयः, सेनापतिलक्षण-सेनारूपचक्र-हंसचारस्वरोदयतत्फलम्, मदनयुद्धस्वरोदयफल-नाडीत्रयवाहकर्तव्यविचारः, तत्त्वविज्ञान-पञ्चतत्त्वध्यान-युद्धजयविचारः, मदनयुद्ध-मूत्रादिप्रसवप्रश्न-संवत्सर-फलकथनम्।

उडी-जालन्धरी-पूर्णाख्या-कामाख्या-कोलागिरिभूमि-एकवीराशिलीन्द्रा-महामारी-वंशजा-क्षेत्रपाली-रुद्रभूमिचक्र-तत्फलनिर्णयः।

रविचन्द्रकालानलभूमि-निरामयभूमि-जयलक्ष्मिका-महालक्ष्मी-विजयभूमि-भैरवीभूमि-बालाभूमि-चण्डिकाभूमि-यामभूमि-अम्बिकाभूमि-कर्तरीभूमि-सिंहलीभूमि-शार्दूलीभूमि-तन्वीभूमिचक्रतत्फलवचनम्।

महामायाभूमि-माहेश्वरीभूमि-देवकोटि-शिवा-शक्ति-धूम्रा-मालाह्वयाभूमि-वराटिका-त्रिमुण्डा-मत्सरी-धर्मभूमि-मृता-क्षया-अक्षया-प्रवरा-दुर्मति-गौरीभूमिचक्रतत्फलवर्णनम्, मारीहारी-बलाख्या-खेचरी-भूचरी-गुह्याख्या-द्वादशीभूमि-भद्रभूमि-केवला-त्रैलोक्यविजया-कालपाशकरालकाचक्रफलविवरणम्।

अपराजिता-वडवा-रौद्री-शिशु-मातङ्गी-अभेद्या-दहनी-जिता-बहुला-महाबहुला-वर्गकालानल-ग्रहराशिलग्न-राहुकालानलस्वरभूमिचक्रतत्फलनिर्णयः, त्रिकालगतभूमि-ऋक्षराहु-पक्षराहु-दिनराहु-खड्गाहु-

अर्धयामराहु-मुहूर्तराहु-कुलिकराहु चक्रतत्फलवर्णनम्, राशिचन्द्र-उदयराशि-पक्ष-दी-तात्कालिक-तत्कालचन्द्रभूमिचक्रतत्फलनिरूपणम्,... प्रत्यक्षायनचन्द्र-सूर्यभूमि-चलयोगिनी-वारयोगिनीचक्र-त्रिविधायोगिनी-षट्त्रिंशत्काल-वारकाल-वायुभूमिका-दिफलनिर्देशः।

खड्गछुरिकाभेद-कुन्तलक्षण-अङ्कुश-पताकालक्षणम्, शस्त्रघट्टनमुहूर्त-शस्त्ररक्षा-शस्त्रपोटन-शस्त्रलेप-धनुर्धारणविधिः, चापप्रशंसाप्रमाण-गुणालक्षण-बाणफललक्षण-शस्त्र-शोधनविधिः, नाराचनालीकलक्षणस्थानलक्षण-गुणामुष्टि-धनुर्मुष्टिविधान-लक्ष्यलक्षण-लक्ष्य-शरलक्षणम्, अनध्याय-समक्रिया-लक्ष्यसंचालनविधिः, शीघ्रसाधनता-दूरपात-दृढप्रहारता-हीन-गति-लक्ष्यचलनगति-शुद्धगति-दृढभेदिता-चित्रवेध-शब्दवेधननिर्णयः।

अस्त्रविधि-संग्रामविधि-रक्षामन्त्र-अभिषेकविधि-रणदीक्षाविधिप्रदर्शनम्, खड्गधनुर्मन्त्र-धनुर्धरप्रशंसा-बाणकुन्त-छुरिकामन्त्र-रक्षामन्त्रकथनम्, रणकङ्कण-वीरपट्ट-रणपट्टमेखला-कवचाङ्गन्यास-कररक्षा-वीरकंकणमन्त्र-लेपाञ्जन-रक्षातिलक-शस्त्रनिवारणविधानम्, गुटिका-कपर्दिकासाधन-त्र्यम्बकयन्त्रविधि-जयकाहलाढक्कादिसाधन-षट्कर्मसाधन-हनुमन्मन्त्रादिसाधन- मण्डूकयन्त्र-स्तम्भनयन्त्र-शत्रुभङ्गयन्त्र-कुकभयन्त्र-मृत्युंजययन्त्रविधिवर्णनम्, छायापुरुषफल-कालज्ञान-भावियुद्धशकुन-युद्धयात्राशकुनवर्णनम्, युद्धमाहात्म्यनिरूपणम्।

---

## १०९

## ८०० रसकामधेनुः।

चूडामणिसंगृहीता

ग्रन्थोऽयं हस्तलिखितो देवनागराक्षरलिपिको नातिप्राचीनो नवीवस्थाकः संपूर्णः। चतुर्भिरधिकारगर्भैः पादैर्विरचितसंदर्भोपन्यासः, आयुर्वेदविदामत्यन्तोपयोग्यः। पत्रसंख्या ४०६ । प्रतिपृष्ठं श्रेणिसंख्या २३ । प्रतिश्रेण्यक्षरसंख्या १७ । पत्रसंनिवेशः १३ × ७।

**आरम्भः**

ॐ स्वस्ति श्रीगणेशाय नमः ॐ

**श्रीप्रासादपरारूढो जयति त्रिपुराप्रियः।**
**नित्यानन्दमयो नाथो गुरुर्नारायणः स्वयम् ॥ १॥**
**उपकरण-धातुसंग्रह-सूत-चिकित्साक्रियैश्चतुष्पादैः।**
**जयति रसकामधेनुश्चूडामणिसंगृहीतेयम् ॥ २॥**

तत्रोपकरणानि रसार्णवे

**रसोपरसलोहानि खल्वपाषाणमर्दकम्।**
**मृण्मयानि च यन्त्राणि धमनी लोहयन्त्रकम् ॥ ३ ॥**

तत्रोपकरणानि

**कोष्ठिका वक्रनालञ्च गोमयं सारमिन्धनम्।**
**संदंशी यदृ ( ? ) संदंशमृत्पात्रायःकरोटकम् ॥ ४॥**
**परिमाणानि च तुला छेदना निकषोपलम्।**
**वंशनाली लोहनाली मुसलोलूखलानि च ॥ ५॥**
**मूषनाड्यस्तथौषध्यो वसनं काञ्जिकं विडम्।**
**स्नेहाम्लालवणक्षारविषाण्युपविषाणि च ॥ ६॥**
**एवं संगृह्य संभारं कर्मयोगं समाचरेत्।**

अत्र रसा दरदाभ्रकसस्यकचपलादयो रत्नानि च उपरसा गन्धतालशिलादयः लोहानि स्वर्णाद्या धातवः एषां भस्मसत्त्वद्रवाः श्रीरसेन्द्रजारणार्थमत्यर्थमुपयुक्ताः।

**अन्तः**

**इति संक्षेपतोऽनेकसंहिताद्युपचारतः।**
**अवशिष्टव्याधिशान्त्यै सामान्यविधिरीरितः॥**

इति रसकामधेनौ सामान्यविधानं नामाधिकारः समाप्तः ॥ ७॥

**शाकद्वीपजविप्रमुख्यसुभिकसंज्ञावदाख्यातिमन्-**
**मिश्रश्रीबलभद्रसूनुहरिरामस्यात्मसंभूतिना।**
**श्रीचूडामणिना कृते सुकृतिना भैषज्यसंदर्भको**
**ग्रन्थेऽस्मिन् रसकामधेनुरचिते पादश्चतुर्थो मतः ॥**

**पुष्पिका**

इति रसकामधेनौ ज्वरादिचिकित्साक्रममयश्चचुर्थः पादः ॥ ८॥ इति श्रीशाकद्वीपनिवासिना श्रीचूडामणिना चतुःपादैरलंकृता रसकामधेनुरचना समाप्तिमगमत् शुभम्।

**प्राप्तव्यमर्थं लभते मनुष्यो देवो अपि तं लङ्घयितुं न शक्तः।**
**तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत्परेषाम्॥**

### १७०

### १०७४ राधातन्त्रम्।

ईश्वरोक्तम्

इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नूतनं नवीनावस्थाकं संपूर्णम्। पत्र-संख्या ४२। प्रतिपृष्ठं श्रेणिसंख्या २४। प्रतिश्रेण्यक्षरसंख्या २४-२८। पत्रसंनिवेशः १३ × ९ $\frac{१}{२}$।

**आरम्भः**

ओं श्रीगणेशाय नमः। श्रीपार्वत्युवाच

**गणेशनन्दिचन्द्रेशविष्णुना परिषेवित।**
**देवदेव महादेव मृत्युंजय सनातन॥**
**रहस्यं वासुदेवस्य राधातन्त्रं मनोहरम्।**
**पूर्वं हि सूचितं देव कथामात्रेण शंकर॥**
**कृपया कथयेशान तन्त्रं परमदुर्लभम्।**

ईश्वर उवाच

**रहस्यं वासुदेवस्य राधातन्त्रं वरानने।**

..........................................................

**निगदामि वरारोहे सावधानावधारय॥**
**वासुदेवो महाभागः सत्वरं मम संनिधिम्।**
**आगत्य परमेशानि यदुक्तं तच्छृणु प्रिये॥**

**अन्तः**

**एतत्ते कथितं देवि हरिनाम सुशोभनम्।**
**एतन्नाम वरारोहे सदा विभववर्धनम्॥**
**अनेनैव विधानेन गुह्यं यः कारयेत्सदा।**
**तस्य तस्य च देवेशि महाविद्या हि सिद्ध्यति॥**

**पुष्पिका**

इति वासुदेवरहस्ये राधातन्त्रे द्वात्रिंशः पटलः समाप्तः॥ शुभमस्तु॥

अस्मिंस्तन्त्रे पटलेषु प्रतिपादिता विषयाः।

१ वासुदेवस्य श्रीत्रिपुरादर्शनम्।
२ द्वात्रिंशदक्षरमन्त्रमहिमवर्णनम्।
३ वासुदेवाय मालार्पणधारणादिनिरूपणम्।
४ मालामातृकावर्णनम्।
५ व्रज-मथुरोत्पत्तिवर्णनम्।
६ पद्मिन्या वासुदेवं प्रति व्रजगमनाज्ञप्तिः।
७ पद्मिन्या राधानाम्ना वृकभानुगृहेऽवतरणवर्णनं कात्यायन्युपासनं राधोभयवंशवर्णनं च।
८ पद्मिन्यास्त्रिपुरानुतारिणीत्वकीर्तनम्।
९ कृष्णावतारकथनम्।
१० वृन्दावने द्वादशारण्यपीठवर्णनम्।
११ वृन्दारण्ये पीठदलवर्णनोत्तरं वृन्दावनमाहात्म्यम्।
१२ कुलाचारसिद्ध्यर्थं कृष्णावतारकीर्तनम्।
१३ कालिन्दीकृष्णतद्द्वयःसौन्दर्यादिनिरूपणम्।
१४ ध्यानतत्त्वनिर्णयः।
१५ कृष्णरहस्य-निर्देशनम्।
१६ कुलाचारसाधनसावरण-तद्ध्याननिरूपणम्।
१७ वासुदेवस्य नानारूपग्रहणनिर्णयः।
१८ पद्मिन्याः कात्यायन्युपासनम्।
१९ कृष्णपरिवारवर्णनम्।
२० कृष्णशरीरलक्षण-पद्मिनीतत्त्व-कुलपूजा-कृष्णवरप्रदानकीर्तनम्।
२१ पद्मिनीवरप्राप्ति-कृष्णशक्त्यन्तरकथनम्।
२२ नौकायामिष्टविद्यासाधननिर्णयः।
२३ तत्रैव पद्मिनीचन्द्रावलीभ्यां नर्मालापः।
२४ राधाकृष्णयोरन्योन्यनर्मकथाकथनम्।
२५ कात्यायनीवरप्राप्तिः।
२६ कृष्णायाश्चर्यप्रदर्शनम्।
२७ कौलाचारसेवनात् कालीतः सिद्धिप्राप्तिवर्णनम्।
२८ कृष्णतत्त्वनिरूपणम्।
२९ जया-विजया-राधामन्त्रतद्ध्याननिर्णयः।
३० राधाकवचम्।
३१ राधासहस्रनामकीर्तनम्।
३२ हरिनामरहस्यवर्णनम्॥

१७२

**१०७७ विद्यार्णवतन्त्रम्।**

विद्यारण्ययतिप्रणीतम्

पुस्तकमिदं हस्तलिखितं देवनागराक्षरलिपिकं संपूर्णं नवीनं नवावस्थाकम् पत्रसंख्या ४०८। प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २६ । पत्रसंनिवेशः १२ $\frac{1}{4}$ × ९ $\frac{1}{4}$ ।

**आरम्भः**

ओं श्रीगणेशाय नमः ओं

**उद्यत्सूर्यसहस्रभास्वरतनुः सूक्ष्मातिसूक्ष्मा परा**
**विद्युत्पुञ्जनिभेन्दुकोटिसदृशी धामत्रयाध्यासिनी।**
**तत्तेजस्त्रितयात्मकैकमुनिभिर्वाक्कामशक्त्याख्ययुक्**
**कूटैस्त्र्यब्धिशरर्तुभिः परिणता नित्यात्मिका पातु वः ॥ १ ॥**
**या श्रीमधुमती शक्तिर्जगच्चैतन्यरूपिणी।**
**सास्तान्मे पुरतो नित्यं मालिनी विश्वविग्रहा ॥ २ ॥**
**मतद्वयं समालोड्य तत्संकीर्णभिया पृथक्।**
**प्रकाश्यते परातन्त्रं मया विद्यार्णवाभिधम् ॥ ३ ॥**
**मधुमत्या महादेव्यास्तादात्म्यं कादिसंज्ञकम्।**
**कालीमतं तु मालिन्यास्तादात्म्यं तान्त्रिका विदुः॥ ४ ॥**
**षट्त्रिंशद्व्यञ्जनैर्मूलभूतैः शिवमयैः पृथक्।**
**षोडशस्वरसंभिन्नैः पूर्णमण्डलसंज्ञकैः ॥ ५ ॥**
**षट्त्रिंशद्गुणितैः सिद्धकालनित्यास्वरूपकैः।**
**नवात्मकैर्व्याप्तिभेदाद् द्विगुणीकृतविग्रहैः ॥ ६ ॥**
**तद्द्वैगुण्यमयैस्तत्त्वैर्यन्त्रैस्तद्द्विगुणीकृतैः।**
**तत्तद्भेदैर्वर्णमूर्तिः प्रोक्ता वेदप्रकारिका ॥ ७ ॥**
**षट्त्रिंशत्तत्त्वसंपूर्णा सर्वमन्त्रफलप्रदा।**
**देवी मधुमती या तत्तादात्म्यं कादिसंज्ञितम्॥ ८ ॥**
**आम्नायसमयापञ्चपञ्चिकापीठदर्शनैः।**
**उत्पत्तिस्थितिसंहारभेदैर्वृन्दमयैः स्तुता ॥ ९ ॥**
**मालिनी कथ्यते या तत्तादात्म्यं कालिकामतम्।**
**मतद्वयपरिज्ञानाच्छिवतुल्यो भवेन्नरः ॥ १० ॥**

विद्याया गुरवश्चेत ऊर्ध्वाम्नायक्रमस्य च।
षोडश्युपासकश्चैतान् नव पंक्तिक्रमाद्यजेत् ॥ ११ ॥
देव्याः पृष्ठप्रदेशे तु विश्रान्ते स्वगुरुक्रमम्।
कपिलोऽत्रिर्वसिष्ठश्च सनकश्च सनन्दनः ॥ १२ ॥

.................................................................... ।
................ गौडः पावक एव च ॥ १३ ॥
पाराशर्यः सत्यनिधी रामचन्द्रस्ततः परम्।
गोविंदः शंकराचार्य एकसप्ततिसंख्यकाः ॥ १४ ॥
शंकराचार्यशिष्याश्च चतुर्दश दृढव्रताः।
देव्यात्मानो दृढात्मानो निग्रहानुग्रहक्षमाः ॥ १५ ॥
शंकर पद्मपादाख्यो बोधो गीर्वाण एव च।
आनंदतीर्थनामा च पञ्चैते भिक्षवः स्मृताः ॥ ६१ ॥
सुन्दरो विष्णुशर्मा च लक्ष्मणो मल्लिकार्जुनः।
त्रिविक्रमः श्रीधरश्च कपर्दी केशवस्ततः ॥ ६२ ॥
दामोदर इति ख्याता गृहिणो नवसंज्ञकाः।
मठपीठोपपीठाधिपत्ययुक्ते ( ? ) न्त्यदीक्षिताः ॥ ६३ ॥

.................................................................... ।
श्रीविष्णुशर्मणः शिष्यः प्रगल्भाचार्यपण्डितः।
तच्छिष्येन मया प्रोक्ते ग्रन्थेऽस्मिन् पूर्णतां गते ॥ ७१ ॥
आविरासीज्जगद्धात्री महामाया ममाग्रतः।
इति प्रोवाच भो वत्स वृणीष्व वरमीप्सितम् ॥ ७२ ॥
तदोक्तवानहं मातर्मत्कृतं ग्रन्थमुत्तमम्।
दृष्ट्वा गुरुक्रमं मन्त्रान् गुरुत्वेन विभाव्य माम् ॥ ७३ ॥
दीक्षां विनापि भक्त्या तु ये जपन्ति च साधकाः।
तेषामतितरां सिद्धिर्भवत्विति ममेप्सितम् ॥ ७४ ॥
सुप्रसन्ना तदा देवी तत्तथैव भवत्विति।
वरं दत्वा मुदाप्यन्तर्हितातो गुरुसंततेः ॥ ७५ ॥
ज्ञानामात्रेण सा देवी तुष्टा भवति निश्चयात्।
जगद्गुरोः शंकरस्य शिष्यो लक्ष्मणदैशिकः ॥ ७६ ॥
लोके विख्यातिमारूढस्तपसा विद्यया श्रिया।
प्राप्यावस्थां तुरीयां तु वीतरागो महीलते ॥ ७७ ॥

विचरन् प्रौढदेवस्य राजधानीं समाश्रितः।
प्रौढस्तस्मै ददौ वेश्मभूषान्नपरिचारकान् ॥ ७८ ॥
एकदा तत्सभामध्ये तस्मिंस्तिष्ठति लक्ष्मणे।
नाना वस्तूनि वस्त्राणि राज्ञे ददुरुपायनम्॥ ७९ ॥
द्वीपान्तरात्समानीय वाणिज्ये ये नियोजिताः।
राजा ददौ लक्ष्मणाय तानि वस्त्राण्यनेकशः ॥ ८० ॥
समादाय निजागारे लक्ष्मणो दैशिकोत्तमः।
कुण्डे विध्युक्तमार्गेण वह्निं संस्थाप्य यत्नतः ॥ ८१ ॥
तानि वस्त्राणि हुतवान् देव्यात्मा भक्तिभावतः।
तच्छ्रुत्वा प्रौढदेवोऽपि वैपरीत्यं हृदि स्मरन् ॥ ८२ ॥
पुनर्दास्यामि वासांसि मूल्यं कृत्वाद्य यत्नतः।
इत्युक्त्वा प्रेरितो दूतो वस्त्रार्थं लक्ष्मणान्तिके ॥ ८३ ॥
तदा स क्रोधचित्तः सन् राज्ञे शापं ददौ तदा।
निर्वंशो भवतु प्रौढो ब्रह्मस्वस्यापहारकः ॥ ८४ ॥
इति वासांसि देवीतो याचयित्वा पुनर्ददौ।
ततस्तन्नगरं त्यक्त्वा गतोऽसौ दक्षिणापथम् ॥ ८५ ॥
तत्रोद्विग्नमनाः प्रौढः स देशं लक्ष्मणस्य तु।
प्राप्य तं प्रार्थयामास मयि देव कृपां कुरु ॥ ८६ ॥
इति तुष्टमना विप्रः प्रोवाच वच उत्तमम्।
राजन् मम वचो लोकेऽप्यमोघं तन्निबोधय ॥ ८७ ॥
तथापि तव भक्त्याहं संतुष्टः सन् ब्रवीमि ते।
भविष्यति तवापत्यं तत्सुखं न भविष्यति ॥ ८८ ॥
तच्छ्रुत्वा प्रमना राजा गतो निजपुरं प्रति।
ततः काले व्यतीते तु प्रौढदेवो महीपतिः ॥ ८९ ॥
अन्तर्वत्न्यां स्वभार्यायामापन्नः पञ्चतां गतः।
ततस्तद्राज्यभारं तु ग्राहितोऽस्मि प्रजार्थितः॥ ९० ॥
अर्ककोटिसहस्रेण द्रव्येण महदद्भुतम्।
श्रीविद्यानगरं नाम्ना श्रीचक्राकारमुज्ज्वलम् ॥ ९१ ॥
निर्माय प्रौढदेवस्य पुत्रे राज्यार्हतां गते।
तमम्बदेवभूपालमुपवेश्य नृपासने ॥ ९२ ॥
तदाज्ञया तत्सदसि विद्वद्भिर्विमलार्थिभिः।

**संप्रार्थितोऽहमम्बाया आज्ञामासाद्य यत्नतः ॥ १३॥**
**नाना तन्त्राणि संशोध्य यामलानि च सर्वशः।**
**मतद्वयं समालोड्य ग्रन्थं विद्यार्णवाभिधम् ॥ १४॥**
**मुदा रचितवानस्मि लोकानामुपकारकम्।**
**............................................................**
**संप्रदायो हि नान्योऽस्ति लोके श्रीशंकराद्बहिः ॥ १७॥**

**अन्तः**

**मात्राद्वादशका ताराद्बिन्दुपाशाय संयुताः।**
**कवचाय हुमित्येतत् तर्जन्यामपि नामया।**
**अकारादिविसर्गान्तं यो जपेत्प्रणवात्परम्॥**
**अस्त्र रक्षय माये चाप्यस्त्राय तदनन्तरम्।**
**फडक्षरसमायुक्तं विन्यसे..... न्वलयोः॥**

इति स्पष्ट उक्तः॥ इति श्रीविद्यार्णवे अष्टादशाश्वासः ॥ १८॥

---

**१७३**

**१०७८ विद्यार्णवतन्त्रम् ( २यो भागः )**

पत्रसंख्या ४०९-१०४१। प्रतिपृष्ठं श्रेणिसंख्या २३। प्रतिश्रेण्यक्षरसंख्या ३० । पत्रसंनिवेशः १२ $\frac{१}{२}$ × ९।

**आरम्भः**

नारदपञ्चरात्रे

**मन्त्राभिमृष्टयोः पाण्योः पल्लवेऽङ्गानि विन्यसेत्।**
**मूलाद्युग्रपदं ग्रान्तं व्यापकत्वेन नारद॥**
**अङ्गुष्ठेऽत्राचरेन् न्यासं मध्याङ्गुलिसमाश्रयम्।**
**अङ्गुष्ठविषयन्यासं तर्जनीशिरसैव हि॥**

**अन्तः**

**श्रीनाथांघ्रिसरोजकल्पकमहाशाख्येकनानाबिल-**
**श्रीमत्तन्त्रकदम्बकाकलनतो विद्यार्णवाख्यं परम्।**
**विद्यारण्ययतिः चकार सुमहत् तन्त्रं सतां प्रीतये**
**श्रीविद्यानगरेऽम्बदेवनृपतौ सन्नीतितः शासति॥**

## पुष्पिका

इति श्रीमहामहोपाध्यायभगवत्पादपूज्य-श्रीगोविन्दाचार्यशिष्यश्रीभगवच्छंकराचार्यशिष्य श्रीविष्णुशर्माचार्यशिष्य-श्री(प्र)गल्भाचार्यशिष्य-(श्रीविद्यारण्ययति)विरचिते श्रीविद्यार्णवे षट्त्रिंशत्तमोच्छ्वासः ॥ ३६ ॥ समाप्तोऽयं विद्यार्णवाख्यग्रन्थः। संपूर्णं शुभमस्तु सर्वजगताम्॥

अस्मिंस्तन्त्रे उच्छ्वासेषु प्रतिपादिता विषयाः

१ विद्यावतारगुरूणामाम्नायक्रमेण त्रिधा क्रमवर्णन-गुर्वर्चा-गुरुशिष्यलक्षण-गुरुपादुका-माहात्म्यवर्णनम्।

२ गुरुपादुकामाहात्म्यतदाचारविधि-समयाचार-गुरुशिष्यपरीक्षा-शिष्याधममध्यमोत्तमत्व-वर्णविभागयोग्यताकालविशेष-ब्रह्मक्षत्रादिस्त्रीपुमादिमन्त्रलक्षणतन्नियोगता-मन्त्रदोषसंचय-तद्दशसंस्कारादि-मन्त्रमेलनादिनिरूपणम्।

३ षोडशार्णधननिर्णय-विद्यामातृकानिरूपणम्।

४ त्रैपुररश्मिक्रम-वर्णस्वरूप-मन्त्रवीर्य-मातृकाविधानतद्यन्त्रविधि-प्राणाग्निहोत्रक्रमप्रदर्शनम्।

५ भूतलिप्यनुष्ठानविधि-श्रीविद्योपयोगिपञ्चसिंहासन-पञ्चपञ्चिकागणादि-पादुकामन्त्रोद्धार-गुरुध्यान-कुण्डलिनीमन्त्रध्यानस्तुति-मूलविद्यातत्कूटत्रयचिन्तन-मूलदेवतास्तुति-शौचादिप्रातःकृत्य-संध्यायागमण्डपपूजादि-भूतशुद्धिप्राणप्रतिष्ठानिरूपणम्।

६ करशुद्धि-अन्तर्बहिर्मातृकान्यास-सृष्ट्यादिमातृकान्यास-तत्त्वन्यास-प्राणायामविधि-योगपीठन्यास-षोढान्यास-रतिकामन्यास-श्रीचक्रन्यासकवच-सृष्ट्यादिन्यासविवरणम्।

७ स्थितिश्रीचक्रन्यासोद्धारादि-षोडश्युद्धारक्रम-मन्वाद्युपासितमन्त्रभेदतदुद्धार-पञ्चसिंहासनविद्या-पञ्चपञ्चिकागण (पञ्चलक्ष्मी-पञ्चकोशविद्या-पञ्चकल्पलता-पञ्चकामदुघा-पञ्चरत्नेश्वरी) षोडशनित्याविद्यानिरूपणम्।

८ पञ्चायतनविद्या-चतुःसमयविद्या-पञ्चाम्नाय-तुरीयविद्यां-चरणविद्या-षोडशविद्या-षडाधारविद्या-समयविद्या-आवरणदेव्यादिगायत्री-षोडशनित्यागायत्री-षड्दर्शनसमयाम्नायपञ्चिकागण-गायत्री-यन्त्र-निर्माणप्रकारवर्णनम्।

९ लोपामुद्रोपासकानुष्ठेयविशेष-पात्रासादनपद्धति-द्रव्यशुद्धिविधानान्तरादिप्रदर्शनम्।

१० आत्मपूजान्तर्याग-शक्तिशोधन-पीठपूजाश्रीचक्रपूजाध्यानादिलयाङ्गषोडशनित्याध्यानगुरुपूजा-आयतनपञ्चपञ्चिकार्चा-पञ्चसमयार्चा-भोगषडङ्गार्चा-विशेषावरणार्चाक्रमकथनम्।

११ ऊर्ध्वाम्नायावरणविधान-काम्यप्रयोगविधान-चक्रराजसाधन-वैदिकमन्त्रमिश्रितश्रीविद्योद्धारप्रयोग-दीक्षाक्रम-षड्दर्शनमन्त्रप्रयोग-पञ्चायतनस्थापनक्रम-शिवलिङ्गनिर्माणविधिनिरूपणम्।

१२ श्रीचक्रनिर्माण-कुण्डमण्डपरचनाप्रकार-कुण्डभेदप्रकार-तन्मानभेदलक्षण-वास्तुपूजातत्फलादि-अङ्कुरार्पणविधि-तन्मण्डलरचना-प्रकार-कुण्डाज्यवह्निसंस्कारादिविवरणम्।

१३ अध्वशुद्ध्यादि-कलादीक्षाप्रकार-पूर्णाभिषेकदीक्षाविधि-दीक्षाभेदनिर्णयः।

१४ कादिमतोक्तपूर्णाभिषेकविधि-नवग्रहपूजाविधान-तिथ्यादिदेवता-तन्नित्यापूजाविधिप्रयोग-षड्धातुदेवतापूजाविधि-पञ्चाशन्मिथुनपूजा-पञ्चदशनित्यायजनविधिप्रयोग-तिथ्यादीश-नवग्रहपूजा-प्रयोगोन्मुद्रणम्।

१५ प्रातर्गुर्वादिवन्दन-संध्याविधि-तर्पणविधि-पीठपूजार्घस्थापन न्यासपूजावरणार्चादि-काल-नित्याजप-नित्याकवच-दिनकृत्य-कालचक्ररचना-कादिमतोक्तपूर्णाभिषेकप्रयोग-नैमित्तपूजा-पवित्रारोपणविधि-शक्तिन्यासादिवर्णनम्।

१६ कालीमतरीत्या पुरश्चरणविधिविवरणम्।

१७ सप्रयोगसिद्धि-रहस्यपुरश्चरणकथनम्।

१८ समयाचारवर्णन-दूतोयाग-अन्तर्याग-पशुबलिविधान-कुमारीयजन-वटुकादिबलि-कुल्लक-प्राणप्रतिष्ठा-नित्यहोमाग्निस्थापनविधानम्।

१९ षडङ्गन्यासार्थतत्त्व-संक्षिप्तध्यानजपहोमवर्णन-शिवपूजाविधि-काम्यपार्थिवेश्वरसंख्या-तत्फल-शिवविष्णुमूर्तिलक्षणभेद-सालिग्रामशिलापूजामाहात्म्य-देवतापूजाद्रव्यलक्षण-तदावरणदेव-तेन्द्रादिदेवताङ्गोपाङ्गमूर्तिलक्षणादिविधिः।

२० नित्यपूजाप्रयोगविधि-भस्मधारण-षडाम्नायरश्मिसंख्या-काम्यानुसारिषोडशनित्याविविधध्यान-प्रतिवर्णवर्णसंहतिरश्मि-विद्यावर्णरश्मि-तत्प्रयोगविधिनिरूपणम्।

२१-२२ त्वरिता-कुलसुन्दरी-नीलपताका-विजया-सर्वमङ्गला-ज्वालामालिनी-नित्या-कुरुकुल्ला-प्रयोग-प्रणवोपासना-श्रीसूक्तप्रयोग-नवरात्रप्रयोगलक्ष्मीहृदयस्तोत्र-दुर्गामन्त्रप्रयोगपद्धति-नवार्णविधानोक्त-महालक्ष्मीप्रयोग-आग्नेयास्त्रप्रयोगप्रदर्शनम्।

२३ कृत्यास्त्रविधान-अन्नपूर्णा-अश्वारूढा-गौरी-पद्मावती-नित्यक्लिन्ना-वज्रेश्वरी-शिवादूती-त्वरिता-वैष्णवी-बगलामुखीतत्स्तोत्रविधानम्।

२४ श्यामामन्त्रप्रयोग-तन्मन्त्रभेद-षोडशीमन्त्रभेद-श्रीविद्यापद्धतिविधिः।

२५ भुवनेश्वरीमन्त्रप्रयोग-भैरवी-त्रिपुरभैरवी-प्रचण्डचण्डिका-छिन्नमस्ता-धूमावती-श्मशानकाली-योगिनीसाधन-बलाबलाविद्या-यक्षिणीभेदमन्त्रप्रयोगकथनम्।

२६ यक्षिणी-मातङ्गी-उच्छिष्टमन्त्र-वाराही-कर्णपिशाचिनी-कालरात्रि-शारदामन्त्रप्रयोगवर्णनम्।

२७ नारायणमन्त्र-लक्ष्मीनारायण-द्वादशाक्षर-दधिवामन-हारिहर-हयग्रीव-वाराह-सुदर्शन-श्रीकर-पुरुषोत्तममन्त्रप्रयोगदर्शनम्।

२८ हृषीकेश-नरसिंह-राम-गोपाल-कृष्ण-मुकुन्दादिमन्त्रप्रयोगनिरूपणम्।

२९ श्रीकान्तादि-रुक्मिणीवल्लभ-मोहनहरि-संतानगोपालादिमन्त्र-कार्तवीर्यार्जुन-सौरमन्त्र अग्निमन्त्राणां प्रयोगविधानम्।

३० पञ्चाक्षर-षडक्षर-उमापति-दक्षिणामूर्ति-मृत्युंजय-पाशुपत-नीलकण्ठ-चिन्तामणि-तुम्बररुद्र-क्षेत्रपाल-वटुकमन्त्रप्रयोगनिरूपणम्।

३१ त्रैयम्बक-महामृत्युंजय-गायत्रीविधान-मन्त्रपारायणक्रम-ललितायन्त्र-षोडशनित्यावासनादिप्रदर्शनम्।

३२ गणेशमन्त्र-मञ्जुघोष-चरणायुध-शास्तृ-वैवस्वत-आसुरी-कुबेर-गन्धर्वराजमन्त्रप्रयोग-पद्धतिप्रदर्शनम्।

३३ ऋग्विधान-नवग्रह-ऋग्विधिप्रयोगपद्धति-मङ्गलपूजा-भौमव्रतोद्यापन-ऋग्यजु:सामाथर्वविधान-पार्थिवपूजाविशेष-भयनाशन-बन्दीमोक्षणादिमन्त्र-हनुमन्मन्त्रवर्णनम्।

३४ हनुमद्यन्त्रपूजाविधान-हनुमन्मालामन्त्र-होमोपयोग्यग्निचक्र-गुर्वभावदीक्षाविधि-मुद्रालक्षण-शांभवरश्मिपूजाक्रम-नवदुर्गाविधाननिर्णय:।

३५ श्वासक्रमादिविधि-अष्टाङ्गयोग-आसन्नमृत्युचिह्न-नवरात्रदेवीस्तुति-नित्यालोकात्मत्व-श्रीविद्यार्चन-होमतत्त्वसिद्धि-भीमत्रिपुरसुन्दरीपूजा-वारक्रमषट्चक्रपूजन-विंशतिप्रश्नसमाधान-नानाविधयन्त्रप्रयोग-श्रीविद्यापद्धतिनिरूपणम्।

३६ मालिनीन्यासाद्यवशिष्टपूजापद्धति-ब्राह्मीविद्या-अन्तेष्टिविधिवर्णनम्।

---

**१७४**

**१०८० शक्तिसंगमतन्त्रम्।**

शिवप्रोक्तम्

एतत् पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नूतनं नवावस्थाकं संपूर्णं सप्तसप्तत्यां पटलेषु समुपन्यस्तग्रन्थार्थसंदर्भणम् । पत्रसंख्या १९३। प्रतिपृष्ठं श्रेणिसंख्या १८ । प्रतिश्रेण्यक्षरसंख्या १६ । पत्रसंनिवेश: ९ $\frac{१}{२}$ × ७ ।

**आरम्भ:**

ओं श्रीगणेशाय नम: ओं नम: सरस्वत्यै ओं

**आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम्।**
**शुष्यन्ति यद्रज:स्पर्शात्सद्य: प्रत्यूहवार्धय: ॥ १ ॥**

श्री आदिनाथ उवाच

**कालि कालि महाकालप्रिये दक्षिणकालिके।**
**कादिहादिमताधीशे षष्टिसिद्धिप्रदर्शनि ॥ २ ॥**
**सद्ब्रह्मरूपिणि शिवे रहस्यमपि कथ्यताम्।**
**पूर्वं संसूचितं देवि न मह्यं कथितं त्वया ॥ ३ ॥**
**तन्मे कथय देवेशि यदि मे करुणा तव।**

श्रीकाल्युवाच

**रहस्यं सर्वगोप्यं यत्तदेव कथितं शृणु ॥ ४ ॥**

**एकं दश शतं देव सहस्रं त्वयुतं तथा।**
**गदितं नियुतं देव तदेव लक्षवाचकम् ॥ ५ ॥**

**अन्त:**

**रहस्यातिरहस्यं च रहस्यातिरहस्यकम्॥**
**रहस्यातिरहस्यं च गोपनीयं प्रयत्नतः।**
**गोपनीयं गोपनीयं गोपनीयं महेश्वरि॥**
**गोपनीयं प्रयत्नेन स्वयोनिरपरा यथा।**
**इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि॥**

**पुष्पिका**

इति श्रीमहाकालशक्तिसंगमतन्त्रराजे दीक्षासननिर्णयः पटलः इति श्रीशक्तिसंगमं संपूर्णम् शुभम् भूयात्॥

अस्मिन् ग्रन्थे पटलेषु प्रतिपाद्यविषयाः प्रदर्श्यन्ते

१ परिभाषाप्रस्तावः।
२ अभिषेकस्तुतिवर्णनम्।
३ आम्नायादिविनिर्णयः।
४ शक्तिकोण-दशविद्याकुल्लकावर्णनम्।
५ यक्षिणीमण्डलनिर्णयः
६ गन्धर्वमण्डलादिदीक्षावर्णनम्।
७ आसन-मालानिर्णयः।
८ वीरसिद्धिसाधनम्।
९ पुरश्चर्याभूतशुद्धिनिरूपणम्।
१० कौलतीर्थनिरूपणम्।
११ चतुष्पीठनिर्णयः।
१२ शक्तिपूजाविधानम्।
१३ तद्विशेषफलवर्णनम्।
१४ संप्रदायफलप्रदर्शनम्।
१५ स्त्रीस्वरूपवर्णनम्।
१६ पुंस्वरूपनिर्णयः।
१७ गवाक्षयोगविधिः।
१८ सिद्धिश्वरीलक्षणम्।
१९ चातुर्वर्ण्यक्रमनिरूपणम्।
२० नवरात्र-वाक्सिद्धि-लतासाधननिर्णयः।
२१ सिद्धिप्रयोग-पूजादिक्स्वरूप-पात्र-
निर्णय-आरत्रिकाविनिर्णय-पात्रसिद्धि-
घटसिद्धिविधानम्।
२२ महानीलक्रमनिर्णयः।
२३ महाचीनक्रमलक्षणम्।
२४ गन्धर्वक्रमविधिः।
२५ छिन्नमस्ता-भैरवीक्रमनिरूपणम्।
२६ बगलाक्रमः।
२७ महाराजक्रमः।
२८ भुवनेशीक्रमः।
२९ कमलाक्रमः।
३० धूमावतीक्रमः।
३१ ब्रह्ममार्गक्रमः।
३२ क्रममाला-विद्याशक्ति-गन्धरूपादि-
निर्णयः।

३३ कलमालामुद्रासंकेत-मुद्रास्वरूप-
प्रदर्शनम्।
३४ पञ्चमुद्रामुख्यसंकेतनिरूपणम्।
३५ लतासंकेतनिरूपणम्।
३६ लतारूपप्रदर्शनम्।
३७ निशापूजाविधिः।
३८ अधिकारिनिरूपणम्।
३९ सिद्धिसाधनम्।
४० वीरसाधनविधानम्।
४१ मुण्डासननिर्णयः।
४२ नैवेद्यविनियोगविधिः।
४३ मालाविधानम्।
४४ मालाग्रन्थनादिविधिः।
४५ मालारहस्यम्।
४६ मातृकावर्णमालोपचारनामनिरूपणम्।
४७ पूजापीठनिर्णयः।
४८ विद्यासिद्धिनिरूपणम्।
४९ सुन्दरीसाधनक्रमः।
५० सूतकादिनिर्णयः।
५१ सूतकाद्यभावप्रदर्शनम्।
५२ यन्त्रस्थापन-धूप-वरासनभेदप्रकाशनम्।
५३ गजाद्यासननिरूपणम्।
५४
५५
५६ यन्त्रधारणविधानम्।
५७ यन्त्रावर्तनविधिः।
५८ यन्त्राधारनिरूपणम्।
५९ यन्त्रसिद्धिकालप्रकाशनम्।
६० रौप्यधारण-मालाभेदप्रदर्शनम्।
६१ मालाफलनिर्णयः।
६२ मालाफलकालकथनम्।
६३ स्त्रीदीक्षाविधिः।
६४ काद्यादिमतमाहात्म्यम्।
६५ कालीयोगरहस्यम्।
६६ आसन-तत्फलकालनिरूपणम्।
६७ ध्यानशक्तियोगनिर्णयः।
६८ शक्तिमहिम-कुलतिथि-पूजाकालयोग
बालाकल्पलतायोगनिरूपणम्।
६९ ब्रह्मराजयोगनिर्णयः।
७० रहस्ययोग-कुलदर्भ-ध्यानभेद-
मुद्राभेदादि-प्रदर्शनम्।
७१ नष्टप्रायश्चित्तविधानम्।
७२ नष्टादियन्त्रसिद्धिसाधन-महायन्त्रग्रहण-
प्रकाशनम्।
७३ मुण्डासनसंस्करणम्।
७४ मुण्डपात्रशोधनतत्सिद्धिनिरूपणम्।
७५ मुण्डसाधनविधिः।
७६ मालारात्रिविधान-तच्छोधनविधानम्।
७७ आसनप्रयोग-तत्फलभेदनिर्णयः।

१७७

## १०८८ शिवताण्डवम् ( मन्त्रशास्त्रम् )

दक्षिणामूर्तिविरचितम्।

नीलकण्ठकृतटीकोपेतम्। शाकसंवत् १६०२

पुस्तकमिदं हस्तलिखितं देवनागराक्षरलिपिकं नवं नवीनावस्थाकं संपूर्णम्। चतुर्दशसु पटलेषु विरचितसंदर्भोपन्याससमापनम्। पत्रसंख्या ३१। प्रतिपृष्ठं श्रेणिसंख्या २१ । प्रतिश्रेण्यक्षरसंख्या ४२ । पत्रसंनिवेश: ११ $\frac{३}{४}$ × ८ ।

**आरम्भ:**

ओं श्रीगणेशाय नम: ओं

**श्रीदक्षिणामूर्तिं गुरुं प्रणम्य**
**तदीरितश्रीशिवताण्डवस्थाम्।**
**यन्त्रावलीमङ्कमयीं पुनस्तां**
**व्याकुर्महे सज्जनरञ्जनाय ॥ १ ॥**
**पूर्वं मया या विहिताङ्कयन्त्र-**
**व्याख्या खलैः सा पिहितातिमौढ्यात् ।**
**अत: पुन: श्रीमदनूपभूप-**
**नियोगतस्तामपरां करोमि ॥ २ ॥**

क: पुनरनूपभूप इत्याकांक्षायां तद्वंशावलिमाह-

**यं नाथं प्राप्य नाकं हसति महमही जङ्गलं नन्दनत्वं**
**प्राप स्व:सप्तकश्रीपदमचलमभूत् पूरि कानेरनाम्नी।**
**शूर: श्रीमान् वदान्य: शमदमसहितो नीतिशिक्षागुरूणा-**
**माद्य: सोऽद्यापि कीर्त्या जगति विजयते रायकल्याणमल्ल: ॥ ३ ॥**
**समजनि विक्रमनगरे राजा श्रीरायसिंहाख्य:।**
**यस्मिन् ददति गजौघान् गजपतिभावं गतोऽविपालोऽपि ॥ ४ ॥**
**दीपादिव प्रदीपस्तस्माच्छ्रीसूरसिंहोऽभूत्।**
**मारवधूर्वोढारं यं लब्ध्वात्मानमुद्भटं मेने ॥ ५ ॥**
**वदान्यानां मूर्ध्नि स्फुरतु लभतां सूतसुततां**
**कुरूणामीशानानवतु ककुभो वा विजयताम्।**
**परप्रीतश्रीको विजयविजितो भूविधुरित:।**
**कथं वा राधेय: कलयतु कथं कर्णसमताम् ॥ ६ ॥**
**श्रीमान् नृपतिपूर्णेन्दु: कर्णक्षीरार्णवोद्भव:।**

यत्कीर्तिकौमुदी भाति विष्वक् संतापनुत्तये ॥ ७ ॥
लोहदारुदृषदामिवोदराद्
वज्रसारमिव ताण्डवादिव।
केन वोपकरणेन कः पुमान्
यन्त्रचित्रमुपनीय दर्शयेत् ॥ ८ ॥
जयत्यनूपभूपोऽसौ यदाज्ञाबलयोगतः।
भिनत्त्यभेद्यमप्यर्थं शौर्यं पाण्डित्यशालिनः ॥ ९ ॥
श्रीमत्स्फूर्जदनूपभूपतिमहाक्षेत्रे निसर्गोज्ज्वले
श्रीमत्सद्गुरुवाक्यबीजनिचयान् उप्त्वा समुत्पादितः।
श्रीमच्चौधरिनीलकण्ठवशिना वर्षं विना भूयसे
भूयाद्दिव्यफलाय यन्त्रलतिकारामोऽयमत्यद्भुतः ॥ १० ॥
शिवताण्डवटीकेयमनूपारामसंज्ञिता।
यन्त्रकल्पद्रुममयी दत्ताद्वोऽभीष्टसंततिम् ॥ ११ ॥

**अन्तः**

अनूपारामोऽयं परमश्चिपदो ( ? ) बीजविभवो
महायन्त्रैः कल्पद्रुमशतसमैरुत्कटफलैः।
समस्तार्थे यत्नस्तमिममनुसंधाय सकल-
श्रियोपेतो भूयाद् भुवि बुधजनोऽनूपकृपया ॥ १ ॥
दृक्पूर्णाष्टि १६०२ समे शकेन्द्रसमये मास्याश्विने विष्णुभे
टीकैषा परिपूर्णतामुपगता करणात्मजप्रीतये।
षण्मन्त्रीहृदयारविन्दरविणा दिव्यार्थरत्नाकर-
त्रय्यम्भोनिधिमन्दरेण विहिता श्रीनीलकण्ठेन या ॥ २ ॥

## पुष्पिका

त्वा प्राणायामं कृत्वा करांगषडंगन्यासौ विन्यस्य मालां शिरसि
संवेष्टगोपयेत् गुरुविमुखेन संयोज्य पुच्छं पुच्छे नियोजयेत् मु
खतः प्रजपन्मंत्री पुच्छेनानकदाचन पुच्छतः प्रजपित्वा तु शो
कदुःखभयादिकं कृतांजलिर्यस्य देवी तस्याधिनरकं किल
नमस्कृतिर्नैवसिद्धिविघ्नस्तस्य सदा भवेत् शतेजाते भवेद्रोगोध
नेन बहुदुःखदं हेलनात्सिद्धिहानिः स्यात्तस्मात् यत्नपरो भवेत्
इति मालासंस्कारः अथ होमः प्रागग्रंउदगग्राश्च तिस्रो रेखा विले

खयेत् तन्मध्ये चतुःकोणमुल्लेपम् कुर्याद्विपश्चात्ततः त्रिकोणमादौ लि
खेत् तन्मध्ये लज्जासमन्वितं हूं ततश्च षट्कोणं कोणवज्जवतुष्टयं
गजकुंभं वा स्वकोणे द्वारयोनिद्वयं द्वयं अष्टयोनियुतं वक्रं गजकुं
भचतुष्टयं एवं कृत्वा एणस्थंडिलं वा कृत्वा देवीं समभावयेत् अस्मै प्रपूज
येद्विलस्य पूषा स्मात्स्थलधारिणं वायव्यं चापि मल्लाणं नैऋत्यां इ
न्दुपवत लक्ष्मीसरस्वती पूर्वे द्वित्रिकोणे प्रपूजयेत् शचीकुस्यो
त्तरस्यां छायां गंगां च पश्चिमे दुर्गां देवीं च त्रिपुटां दक्षिणस्यां प्रपू
जयेत् आग्नेये च यजेद्देवान् सकंदेशपुरंदरान् यजेद्देवीं जगाधि
पु ब्रह्मविष्णुरुद्रकान् देवीं प्रपूजयेत्पश्चात् त्रिकोणेषु सदाशिव
दुर्गां कांचीं तथा कालीं त्रिपुरां भैरवीं तथा असितां पूजयेत्कोणेता
रिणीमोददायिनीं मध्ये प्रपूजयेत् हस्ययष्ट्या पंचोपचारकैः देव्या·
योनिं समभाव्याष्टभावयेद्रजोयुतां पुष्पांजलित्रयं दत्वा कांडं तत्र
निपातयेत् ततो वह्निं समानीय कांस्यपात्रे स्थितं शुभं ॐ क्रव्यादे
भ्यो हुं फट् स्वाहा इत्यनेन त्यजेद्बुधः पुनर्मूलेन चानीय योनिमध्ये
निधापयेत् योनिमुद्रां प्रदर्श्याथ मूलं तत्र जपेद्दश तत्र देवीं चिंत·
यित्वा रजस्वलायोनिमंडले गंधपुष्पेण संपूज्य देवीं सर्वार्थसाधिनीम्
ॐ चित्पिंगल हन २ पच पच मथ मथ विध्वंसय विध्वंसय मम
दुष्टान्पापान् सत्वान् शत्रून् ग्रस ग्रस पिब पिब अनेन होमेन
सर्वांस्तान् तापय मम सर्वकार्याणि साधय स्वाहा इति पठित्वा व
ह्निं ध्यापयेत् रजोगुणसमुद्भूतं रक्तवर्णं त्रिलोचनं द्विभुजं सर्वपा
पघ्नं समिद्धं विस्फुटोमुखं नानालंकारसंयुक्तं वह्निजिह्वासमन्वि
तं एवं ध्यात्वा अग्नेस्त्वं वरदनामासि इति नाम कृत्वा वरदनामाग्नि
रेहागच्छ गच्छ इह तिष्ठ तिष्ठ मम सर्वकर्माणि साधय स्वाहा

तारार
हस्य
१९

इत्यावाहयेत् ततो मूलेन नमस्कुर्यात् एवमन्यस्यापि अक्षवस्य च आ
ज्यपात्रस्य दक्षिणभागाद् आज्यं गृहीत्वा मूलेन अग्नेर्दक्षिणनेत्रे जुहुया
त् तथा वामभागाद् आज्यं गृहीत्वा वामनेत्रे मध्यतो मध्यनेत्रे ततो म
हाव्याहृतिभिः ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ भूर्भुवः
स्वः स्वाहा इति सोमसूर्ययोर्विना ततो मूलेन एकादशाहुतिं हुत्वा
श्रीताराद्याः पीठदेवताभ्यः स्वाहा ततः अक्षोभ्यक्षयं ततः
काम्यकर्मचेत्संकल्पतिथ्यं चेन्नतथा त्रिमध्यतितेन प्रकृतहोमं स
माप्य श्रीसद्वीतरो महाव्याहृतिभिर्हुत्वा आवरणदेवताभ्यः आ
ज्याहुतीर्हुत्वा वह्निं गन्धपुष्पमालातांबूलैरभ्यर्च्य श्रीसदाशि
वं पूर्वमावाहतिमग्नये दत्त्वा मूलेन पूर्णाहुतिं दत्त्वा वह्निं प्रदक्षिणी
कृत्य प्रणम्य कामोदक्षिणाभिः तिलकं तन्मूलेन संहारमुद्रया
क्षमस्वेति विसर्जयेत् इति होमः यत्रास्ति कमलाकृताजलिप
रादीक्षयन्तासारदा तारवाक्यमनुस्मरन्प्रियतमे वामावचः
कारणं ब्रह्मानन्दकृतो हस्साधनविधौ ताराहस्ये शुभे दीक्षा
दौ पटलो द्वितीयः शुभदः सत्यः स्वसिद्धिप्रदः ॥ ॥ ॥
अथ मंत्रविस्मरणप्रायश्चित्तं ताराविरामे तारार्णवे चन्द्रमसां भ
वस्थान्येव कालीतारास्तविद्यास्तु यदि स्यान्मंत्रविभ्रमः तारा
पूजां ततः कृत्वा चैकलिंगे शिवालये कृष्णासनस्थितो वीरो जपे
त्पद्मावतीमन्त्रं एकादशसहस्राणि ततो मंत्रस्मृतिर्भवेत् काली
तारास्तविद्यास्तु चक्रचिंता न विद्यते अरिदोषादिदोषैर्न लोको
लिप्यते क्वचित् यदि भाग्यवशाद्देवि तारामंत्रं प्रलभ्यते करणी
न्यधिकं चक्रं न च तत्र परीक्षयेत् ताराविद्याचक्रमध्ये न कदाचिद्व
नी भवेत् महाचीनक्रमं प्राप्य सर्वसैर्वज्ञो भवेत् तस्मादेवाश्च

स्मरणात् आगमोक्तेऽपि च साधकः साधने पूजने वापि महाचीनं त्यजेन्न
च महाचीनं महानीलं न साधयति यो नरः न तस्य साधने शक्तिः कल्पी
पाके महीयते वामाचारं परित्यज्य पूजनं न जपं चरेत् सर्वाचैकार्के
चोरं यावद्दिक्षु चतुर्दश वामाचारं विना देवि तारायाः परिपूजनम्
पुण्यकार्यं मरणघोरं पदे चरन्कार्यं च न पूजा तन्न योग्यस्य न संभवेत्
चरणं महाचीनक्रमं कृत्वा सर्वाचैकार्काणि पदं पंचतत्त्वं वि-
नादेवि ब्राह्मणः शूद्रतामियात् पंचतत्त्वयुतो देवि शूद्रोऽपि विप्र
तां व्रजेत् ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवान्त्यजास्तथा महा
चीनक्रमं कृत्वा शिवः साक्षाद्भवेत्स्वयं कौलं दृष्ट्वा यदा कौलं तस्य पू
जां न कारयेत् चक्रे स्थिता यथा मंत्री लतायोगं समाचरेत् मध्ये चक्रे
स्थितः कौलः शक्तिभ्यः साधकाय च दानं नैव मनश्चक्रे स्वयं नेतं प्रव
र्तते अथवा दिवसं प्राप्य कुलपूजां चरेन्न च साधकानपि शक्तिस्व
स्वेच्छाचारैर्न तोषयेत् प्रसन्नमनसा वापि सत्कौलाय प्रदीयते स
र्वसीयकुलैः सार्धं क्रियते चक्रतत्क्रिया तस्याश्च मालाच पूजाप
द्धतिरेव च धारणस्यापि कवचं हीयते योगिनीगणैः वह्निना दह्य
ते वापि जले वापि प्रलीयते चौर्याद्वा नीयते कश्चित् तत्सर्वं योगिनी
गणैः एवं चेज्जायते वत्स यंत्रादिहरणं शिवः पंच कौलान्समानीय
कुमारीं च विशेषतः गंधादैश्च संपूज्य वंदयेच्छिरसा ततः होमं
कुर्यात्सहस्रं तु चक्रमध्ये स साधकः अष्टोत्तरशतं कुर्यात् तर्पणं स्था
पकोऽनमः दशमी ताम्रेवेनापि सर्वदोषैर्न लिप्यते यंत्रादिनाशे वै
तत्र प्रायश्चित्तं शिवोक्तितः प्रजपेद्वर्णमालाभिः रक्षेत्शतमत
म् ॥ अथ पंचतत्त्वसंस्कारः लाक्षारुणगृहे वापि कामा।
त्मा वदेन नः सर्वं गारवेषां च कुर्यात्साधकसत्तमः सिन्दूरं
कुंकुमं वापि धारणं कुलचन्दनं वामभागे कृताशक्तिः सर्वाभरण

शोभना गंधपुष्पादिनैवेद्यैः पूजयित्वा तु साधकः षट्कोणं बिंदु
तारार युक्तं हृद्यं वापि त्रिकोणकं पुनरष्टदलं चतुष्कोणं कुंकुमेन विलेखयेत्
हस्य· रक्तचंदनसंलिप्तं रक्तवस्त्रेण वेष्टयेत् मूलमंत्रेण संवीक्ष्य योनिमुद्रां
१३ प्रदर्शयेत् देवतां तारयेत्तत्र परमानन्दरूपिणीं प्रणमेत्पंचमुद्राभिः
कारणाधारमुत्तमं ह्रीं नमो योनिमुद्रादौ फ्रं नमश्च हस्तांजलौ क्लूं
नमः कलमुद्रायां स्त्रौं नमो मत्स्यरूपके ह्सौं नमः संपुटाकारे पंचमु
द्राः समीरिताः प्रोक्षयेन्मूलमंत्रेण धूपयेत्तेन कारणं गंधपुष्पं ततो
दत्वा प्राणायामं समाचरेत् ऋष्यादिन्यासं कृत्वा तु करांगं षडं
गकं वर्णन्यासं ततः कृत्वा पंचमुद्राः प्रदर्शयेत् धेनुं योनिं च मत्स्यं च
शंखं खेचरीं ततः परं ह्स्लं दत्वा ततः पाशे पदे मंत्रमनुत्तमं ॐ एकमे
वपरं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां तेन ते नाशया
म्यहं ॐ सूर्यमंडलसंभूते वरुणालयसंभवे अमाबीजमये देवि
शुक्रशापाद्विमुच्यतां ॐ देवानां प्रणवो बीजं ब्रह्मानंदमयं यदि तेन
नसत्येन देवि शिवब्रह्महत्यां व्यपोहतु ॐ वां वीं वूं वैं वौं वः ब्रह्मशा
पाद्विमोचितायै सुधादेव्यै नमः इति दशधा जपेत् ककारो रेफसं
युक्तः षष्ठी चैव चन्द्रसंपुटं सुधाकृष्णशापं मोचय मोचय अमृतं
श्रावय श्रावय स्वाहा इति दशधा जपेत् ॐ क्रौं क्रीं क्रूं क्रैं क्रौं
क्रः कृरिकाभवशोभितं सर्वपश्चजनमनस्त्वधीन्द्रियाणि स्तंभ
य स्तंभय नाशय नाशय चालय चालय इति त्रिः ॐ परमस्वामिनि
परमाकाशशून्यवाहिनि चंद्रसूर्याग्निभक्षिणि पात्रे विश विश
स्वाहा इति त्रिः तन्मध्ये भावयेद्देवीं अमृतानन्दनन्दिनीं सूर्यको
टिप्रतीकाशां चंद्रकोटिसुशीतलां रक्तवस्त्रपरीधानां सर्वालंका
रभूषितां रक्तकेयूरांगदाद्यैः शोभितां सर्वरूपिणीं इति ध्यानं विधा
तव्यं सुधामध्ये साधने च सुसाधकैः पूजयेद्बिल्वपत्राद्यैरमृतानंद

नंदिनीं तन्मध्ये भावयेद्देवं भैरवं भैरवीप्रियं अमृतार्णवमध्यं पंचवक्त्रं
त्रिलोचनं वृषारूढं नीलकण्ठं सर्वाभरणभूषितं अष्टादशभुजैर्यु
क्तं गदामुसलधारिणं खड्गखेटकपट्टीशमुद्गरं शूलदंतकं पाशां
कुशशरं चापं मुद्रां विद्यां च मालिकां मृगकपालं नागं च विश्वतःस
र्वरूपिणं जटामंडलमध्यस्थं सुधामध्ये विभावयेत् पूजयेद्गंध
पुष्पाद्यैर्देवदेवं महेश्वरं ॐ आनंदेश्वराय विद्महे सुधादेव्यै धीमहि
तन्नोऽर्द्धनारीश्वरः प्रचोदयात् इति दशधा जपेत् तदुपरि मूलं
एकविंशतिवारं वं इति सुधाबीजं एकविंशतिवारं जपेत् मूलेन
त्रिगंधपुष्पं क्षिपेत् सुधामध्ये लिखेद्योनिं योनिमध्ये हसौः ततः तन्म
ध्ये तारयेद्देवीं तारिणीं सिद्धिदायिनीं स्ववामे लेखयेद्धीमान् बिंदु
युक्तं मनोहरं त्रिकोणं वाष्टदलं च षट्कोणं वृत्तमेव च अष्टकोणं
लिखेद्विद्वान् मूलेन परिपूज्य च श्रीपात्रं तत्र संस्थाप्य सुधां किंचित्समा
नयेत् स्वल्पपात्रे ततो नीत्वा सुधां किंचित्समानयेत् पात्रांतरस्थ
हीतस्य शुद्धिं चापि निवेदयेत् ॐ सर्वपक्षिक देवता मम कल्याणं
कुर्वंतु ह्रीं क्रौं स्वाहा इति पठित्वा वहस्तात्रोपरि त्रिः परिभ्रामयि
त्वा श्रीपरिभ्रामयित्वा बिल्वमूले चतुष्पथे नयात् तडागे वेश्यागा
रे वा क्षिपेत् ततस्तत्र देवीं समावाह्य स्वकल्पोक्तविधिना परदेव
तां संपूज्य सामान्यार्घ्यविशेषार्घ्याद्यैः ततो भावयेत् सुधादेवीम
मृतानंदनंदिनीं सदा षोडशवर्षीयां प्रसन्नास्यां त्रिलोचनां रक्ता
भरणशोभाढ्यां नानालंकारभूषितां कामदेवेन चोन्मत्तां कम।
कारूपधारिणीं सदाशिवमयीं देवीं रत्नहारसमन्वितां महामो
हप्रदां देवीं भावयेत्साधकाग्रणीः ततः पुष्पांजलिं दत्वा तन्नैवे
द्याक्रस्वासादिकं कृत्वा कुंकुमकर्पूरगंधचन्दननानानन्दज
नकपरदेवतायां मंत्रेण भावयेत् द्रव्याणि दापयेत् ततः कृत्वा

जलिः ॐ नमस्ते मेरुयोदेव्यै तारकासिद्धिनित्यशः दोत्रपुष्पप्रदा
येच भुञ्जे मुञ्जे महेश्वरी भावयित्वा महादेव्यै कामेश्वर्यै विशेषतः
माता कामेश्वरी देवी पिता कामेश्वरः स्मृतः द्वयोर्योगं विभाव्याथ इ
नयेत्परदेवतां कालिकां तारकां वापि येनार्पयेत्तस्मै नमः महाची
नक्रमे तेन च प्रतेद वह्निशोधनं येच — — श्वरं तां त्यां तनत्सर्वं दृष्याह
ष्या इति तत्त्वसंस्कारः मांसं तत्र समानीय शोधयेन्मूलमंत्रतः साध
येत्परया भक्त्या इदं मंत्रं समुच्चरन् ॐ तद्विप्रासो विपन्यवो जागृवांसः
समिन्धते विष्णोर्यत्परमं पदं ॐ कलामांसं महामांसं मांसं श्वाणादि
कस्य च योषावज्रं सर्वमांसं ताराया शुद्धिहेतवे परमानंददेवैव
मांसं परमकारणं ताराया प्रियं द्रव्यं सर्वदोषविहायच ॐ ह्रीं
ह्रैं मांसं महामांसं शोधय शोधय ॐ ह्रीं ह्रौं स्वाहा इति मांसशुद्धिः
यदा हिरण्यरूपं च श्रं उनं विश्वरूपिणं महाहिवलयं देवं मत्स्यरूपि
णमव्ययं महामहेति विख्यातं मीनं तारा प्रियं सदा ॐ ह्रीं क्रूं सौं
ह्रुं सः सः सः इमं मीनं शोधय शोधय स्वाहा इति मीनशुद्धिः ॥
योनिमुद्रां ततो दृष्ट्वा वहाच योनिमुद्रिकां प्रचेदिमं मन्त्रं वत्स सर्व
कर्मसु सिद्धये योनिविद्यां महाविद्यां कामाख्यां कामदायिनीम्
ततः सिद्धिप्रदां देवीं कामबीजादिकां परां ॐ क्लीं कामेश्वरी महामा
ये क्लीं कालिकायै नमः ॐ योनिविद्यां महाविद्यां चतुर्वर्गप्रदायि
नी कलाकलासु वितानं ताराना मतो मिते ॐ ह्सौं ब्लूं ह्सौं ह्रः यो
नि विद्ये योनि सिद्धे योनिकारणकारिके कामदा कामदा·· यात
त्वमध्ये महामहा ॐ सौं वाले वाले त्रिपुरसुंदरि योनिरूपे मम सर्व
सिद्धिं देहि देहि योनिमुद्रां ऊरु ऊरु स्वाहा इति मुद्राशुद्धिः ततः
शक्तिशोधनं ॐ ऐं क्लीं त्रिपुरादेवि सर्वशक्ति प्रवर्त्ते देहि देहि ॐ
ऐं इति तस्याः शीर्षे दशधा जप्त्वा तस्या दोष्णे मातृकान्यासं कृत्वा।

अक्षादिन्यासं करांगन्यासौ विन्यसेत् मूलेन हृदाय प्रांतं जपेत्
इति शक्तिसंस्कारः मूलं चोक्त्वा स्ववामे तु त्रिकोणं विलिखेद्बुधः
तन्मध्ये लिखेल्लज्जां कामतत्त्वस्वरूपिणीं तत्र पूजाविधानमार्गं
पञ्चभ्यो तैरपि साधकः स्वापशक्तीच प्रणम्य च पुनः पुनः लज्जा
पूर्वं जलं दत्वा आनीतां नीत्वा च साधकात् तर्पयामीति चोक्त्वा तत
पीयूषमानयेत् वामहस्तानामिकया पुण्यगृह्योगाश्रयेत् ह
स क्ष म ल व र यीम् आनन्दभैरवीं तर्पयामि स्वाहा इति शु
द्धपुष्पासारेण जलरूपे त्रिस्तर्पयेत् एवं गुरुं परमगुरुं पराप
रगुरुं परमेष्ठिगुरुं ह स क्ष म ल व र यं आनंदभैरवं स्वाहा
इति त्रिः ततो हृदये तद्रूपेण मूलमुच्चार्य श्रीमासेकजटां परम
दात्री तारां देवीं तर्पयामि स्वाहा एवं सर्वत्र देवीविषये तथा च ता
रानिगमे — तर्पयेद्यदा तारां तर्पयेत्कालिकां परां तर्पयेत्षोड
शीं देवीं छिन्नमस्तानिष्फलाक्रिया यतः काली परा प्रोक्ता सा तारा
परिसप्रभा सैव श्रीषोडशी देवी महात्रिपुरसुन्दरी अभेदं तार
योस्तु सएव श्रीसदाशिवः अत्र था भावयेद्यस्तु स मूढो भूतले
स्वर स्वर्गमर्त्ये च पाताले घस्याद्युगमाश्रयेत् सभवेत्कल्पपाद
पो महामोक्षस्त्रक्रूलकः यत्रास्ति भोगो न च तत्र मोक्षो यत्रा·
स्ति मोक्षो न च तत्र भोगः श्रीसुन्दरी तर्पणतत्पराणां भोगश्च
मोक्षश्च करस्थ एव ततः स्वदक्षिणकरतले त्रिकोणं विलिख्य
शुद्धिमुद्रां सर्वत्रिकोणमध्ये संस्थाप्य लज्जाबीजं दशधा जप्त्वा
ॐ ह्रीं हूं ह्रां ह्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः
बीजतत्त्वं श्रद्धः कोणस्यपरमतत्त्वेन शोधयामि स्वाहा इति शुद्धि
खंडं वामहस्ते नीत्वा शृङ्खीयात् वामखंडं नीत्वा ॐ ह्रीं हूं ह्रां

तारार
हस्य.
१५

ह्रीं कें खें गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं वामतत्वस्थ
परमतत्वेन शोधयामि स्वाहा इति पूर्ववत् ततो दक्षिणखंडं नीत्वा
ॐ ह्रीं हौं क्रों स्त्रीं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं
दक्षकोणस्थ तत्वेन शक्तितत्वं शोधयामि स्वाहा इति पूर्ववत्
ततो मध्यखंडं नीत्वा ॐ ह्रीं हौं क्रों ह्रीं लं क्षं माधातत्वेन माया
तत्वं शोधयामि शोधयामि स्वाहा इति पूर्ववत् ततश्च साधके
भ्यः शक्तिभ्यश्च पात्रे शुद्धिं च दद्यात् सर्वं यथाविधि कर्म कुर्वीत
ततः कुण्डलिनी मुखे पात्रं गृहीत्वा पात्रोपरि जपेन्मंत्रं समग्रधा
साधको नमः गुरुं स्मृत्वा पिबेत्तथ्यं सर्वकामार्थसिद्धिदं ततः
कुण्डलिनी मुखे मंत्रपूर्वकं जुहुयात् प्रथमपात्रं नीत्वा द्विती
यपात्रे पात्रोच्छिष्टं पिबेत्तथ्यं वीरोच्छिष्टं तु वर्वणं वीरोच्छिष्टं
प्रथकात्ने पशुपानं प्रकीर्तितं निन्दाश्रुतिः साधकानां हिंसा
तानं कुर्वीयतः निंदा वा शक्तिकौलानां साधकानां न पूजनं अ
निच्छया शक्तियोगं वक्रे वापि च मैथुनं कामतः शक्तियोगं वा
तथानंदैवतेन च जपहोमविहीनेन भक्तिहीनेन कुलार्चनं प्र
कटं साधकानां च अमंत्र एवं साधकः पशुधर्मयुतः कौलाधमः
कौलः प्रकीर्तितः पंचमं पूर्वतः कृत्वा चतुर्थं जलमाचरेत् जप
पूजां विना पानं पशुपानं प्रकीर्तितं ॥ ॥ अथ पात्र
वंदनमंत्राः श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतस्लावितं क्षेत्रा
धिष्ठितयोगिभिर्जनगणैः सिद्धैः समाराधितं आनंदार्णवकं म
हात्मकमिदं साक्षात्त्रिखंडामृतं वन्दे श्रीप्रथमं कराम्बुजगतं पा
त्रं विशुद्धिप्रदं हेमं नीलकण्ठावितं सुमहिमा योगं महामांस
कं किंचिन्नेत्रविचंचलं रविवरच्छायापदं शाश्वतं आनंदादि

महार्णवे विगलितं ज्ञानं महामोक्षदं वन्दे पात्रमहं द्वितीयमधुना-
त्मात्मावबोधक्षमं महापद्मे करे पद्मे योतिमालोकयन्त्रिया दग्ध
मीनसमोपेतं वन्दे पात्रं तृतीयकं मुद्राख्यं योनिमुद्रां सिद्धिदां सि
द्धिरूपिणीं मज्जासिपरयामज्ञा चतुर्थं परयाम्यहं योनिनालिंग
मात्रेतं पंचमं परिकीर्तितं तद्भुतेनामृतेन कल्पयामीह पंचमं
सदानंदप्रदं दृढं महानंदप्रदायकं गुरुपादगतेदाने षष्ठं पात्रं नमा
म्यहं समुद्रसमसंभूतं समुद्रवारिजं शुभं समुद्रे निगमे ग्रामे गृह
णामि सममीस्वधां अष्टदुर्गाशक्तिरूपां सहिंसासरनाशिनी
प्रनातिस्त्राजगद्धात्री नवमी शंकरप्रिया महाविद्याद्यपात्रोक्ता
मरुती सिद्धिदायिनी महामोहविनाशं च मोहिनी दशमे करे प
कादशमहारुद्रावस्त सिद्धिप्रदायकाः चतुःषष्टिसिद्धिदा स्वा
न्वंदे चैकादशकरे द्वादशो द्वादशादिभ्यः सप्ततर्पणतत्पराः वा
मनेत्रस्वरूपेण द्वादशं वन्दयाम्यहं त्रयोदशो महाविद्या सारदाय
रिभूयते वाचां सिद्धिप्रदो देवी वन्दे पात्रत्रयोदश इतिवपोस्य
पात्रवंदनं सदासुखदं अन्यदष्टकारांतरं पात्रबंधनं गृह्णंतो दश
ते तत्कालीतारासुंदरीत्रिपुरीतरविषयं यावन्नचलते चतुर्थं
वक्रवलते मनः तावत्पानं प्रकर्तव्यं मंत्रसिद्धिप्रदायकं पीत्वापी
त्वा पुनः पीत्वा पुनः पतति भूतले उत्थाय च पुनः पीत्वा पुनर्जन्म
न विद्यते अथतासनिगमोक्तं केवलं श्रीताराविषये सर्वमात्र
वन्दनमंत्रश्चैकश्चैव ॐ नाहं कर्ता कारयिता न च मे कार्यं नाहं भो
क्ता भोजयिता वा न च भोज्यं अहं विदात्मा स्वयमेव तेजः स्वयं प्र
काशिस्वरहं स्वरूपः नान्यस्मरेन्न च भजे परित्राय वाञ्छा नास्यांत-
योन च गतिः परिहाय वांछां इति पाने सर्वत्र शुद्धिप्रकेन अथ

तारार
हस्य.
२०

मेयथाशक्ति पिबेत् ततः पंचतत्वक्रमः प्रथमं वामहस्ते त्रिको·
णाकारपानमुद्रयाद्यं नीत्वा दक्षिणहस्ते शुद्धिं नीत्वा मूलमुद्रा
यौ इदं शुद्धिपक्कासवं श्रीमन्नारायकजटामहादेव्यै नमः सर्वत्र
शुद्धसंस्कारे मूलमंत्रजपः वामहस्ते मांसं धृत्वा मूलेन यथाजन्मा
पद्मामांसशुद्धिः श्रीमन्नारायकजटादेव्यै नमः ततो मीनं वामह
स्ते नीत्वा पद्मामीनशुद्धिः श्रीमन्नारायकजटादेव्यै नमः ततः
शक्तिलिंगमुद्रां प्रदर्श्य पद्माशक्तिः श्रीमन्नारायकजटादेवी
महानंदकल्पनाथे रस रस पश्य पश्य प्रसीद प्रसीद अस्माक
नो मम सिद्धिं देहि देहि ॐ ॐ ॐ स्वाहा इति निवेद्य यथायोग
मानन्दं कृत्वा चक्रादितरस्थाने शक्तिं नीत्वा स्वपुरतः पुरीमुखे
संस्थाप्य तदुपरि विंदुर्विनिक्षिपेत् कृत्वा योनिलिंगमुद्रां प्र
दर्श्य अदीक्षिता वेत् कर्णे लज्जाबीजं मन्त्रा कृतांजलिः शा
क्तिरूपे महादेवी योनिसिद्धिस्वरूपिणि प्रसीद जगतां स्रष्टिका
रिणी बलरूपिणि योनिरूपा महाविद्या योनिसिद्धिप्रदायिनी
सृष्टिप्रजायते यस्मात्स्वत्वेनापि पाल्यते पुनः प्रलीयते यो
नौ सृष्टिस्थितिलयालये साधयामि महामंत्रेनेन सिद्धिं विधे
हि मे ॐ ह्रीं ह्रीं क्लीं कामेश्वरि महात्रिपुरे त्रिपुरालये ममैव सि
द्धिं देहि देहि स्वाहा इति पठित्वा लिंगेशाप मंत्रे समथाजन्मा दि
गंबरीभूत्वा तां दिगम्बरीं कृत्वा पश्यं दृष्ट्वा तथा विम्बं रविविम्बं
चामरं सफरीं चापि शिखरं तथा नाभौ प्राप्तं जपेत् योनिमध्ये
प्राप्तं जप्ता प्रवेशं कारयेद्बुधः महायोनिमयी देवी पार्वती परि
भावयेत् स्वयं शिवस्वरूपः स्यात् आत्मानं शिवरूपिणं भावयि
त्वा निर्विकारं स्वयं ब्रह्म विचारयेत् साधको भावयेद्यस्तु का

मुको वा प्रजायते पश्चात्तेन रके घोरे नमोक्षः कोटिजन्मतः तस्मा
त्सर्वप्रयत्नेन निर्विकारो भवेत्स्वयं अन्यथा सिद्धिहानिः स्या
त्ततेन रके स्वयं ॐ नाभि चैतन्यरूपाग्नौ हविषा मनसा स्रुचा
ज्ञानं प्रदीप्यते नित्यम् अक्षवृत्तीर्जुहोम्यहं ॐ धर्माधर्म हविर्दी
प्ता आत्माग्नौ मनसा स्रुचा सुषुम्नावर्त्मना नित्यम् अक्षवृत्तीर्जु
होम्यहं इति मंत्रेण ततः तत्रासने स्थिता सह स्वं जपेत् ततः
पात्रं प्रक्षाल्य ऊर्ध्ववदने मायाबीजं विलिख्य तत्स्थाने म
दा गोपयं स्पृशामि पादेन यो मां पश्यति वक्षसा सप्तवदाम
नां याति यदि शक्रसमो भवेत् इति ललाटे टीकां नीत्वा वि
हरेत् द्रव्यं वारुणीति तोलकमितं पात्रे सदा वेशयेत् साध
के भक्ष्य शक्तिभोक्ता पात्रं समानयेत् साधयेत् त्रिविधे भावैर्दि
व्यवीरपशुक्रमैः दिव्यास्तु देववत्प्रायः सदाचारपरायणाः
करुणाध्यानं तथा पाठं हिंसा छेद विशेषतः स्नानं संध्यां च पू
जां च दिवा कुर्यात् त्रयं त्रयं परस्त्री मातृवत् पश्यंत्यपि पुत्रवद्दिश
ते सदा सत्यं स्मृत्वा ब्रह्मचारी भवेद्ध्रुवं यो भावकं अर्
शापि कूर्चं वा साधकोत्तमः इष्टामंत्रं जपेल्लक्षं द्वादश लक्ष
णिम् अस्त्रेण तत् तर्पयेत् यथा देवी तारा तारक दायिनी साक्षा
दिव्यो भवेत् सोपि परदियोधा त्रिच स्पृशेत् योषा स्पर्शन मात्रेण
दिव्यभावो हि यो भवेत् यावत् न पशाकर्तव्या नाक्षोभो विवर्ज
येत् मत्स्यमांसं तथा तैलं क्षिप्यात्रं मोदकं तथा स्त्रीस्पर्दोने
वदहयो वा यथा पतनं भवेत् याते सिद्धवत्नपसि ऋतका
ले ब्रजेत् स्त्रियं पंचपर्व वर्जयित्वा न चेद्दोषो भविष्यति अत्रायं सं
क्षेपः भावसारावसा आख्यातं वीराचारं चापि संक्षेपतः का
मा त्योमले आख्यातं पश्वाचारस्तु विंतीत कामिनीं वापि

शवं वा न च साधयेत् कालीतारामविद्यास्तेनैवांतर्धनं चरेत्
पीठस्थानं भावयेत्तत्परयोषां न दर्शयेत् वीरभावक्रमो दिव्यस्त
स्माद्दिव्यः प्रशस्यते अत्राकृत्वा भवेद्वीरो न पश्वाख्यकलोकवित्
येनैतेन प्रकारेण पशुभावं विवर्जयेत् स्वेच्छायस्तवनेनैवासि
कासिद्धिस्तेन भारत अथ तारानिरामोक्तस्तोकमेकं शृणु तिस्तो
त्रं ॐ मा हित्वं करुणमयि प्रियतमं सत्साधकं रक्षतात् भ्रष्टात्मा
पापनाशाय प्रियतमा वक्त्रारविंदं मया निःसंदेहं साधुसर्वाव
यमयी सिद्धिः शिवे सिद्धिदम् तां मे मोक्षविधायकं कुरु शिवे सं
हारिणि पापघ्ने इति शान्तिस्तोत्रं पठित्वा पश्चाद्विहरेत् चक्र
मध्ये भवेद्या सा चक्रध्यानं च कुरुवित् कथ्यात्त भवेत्सापि ना
शायनरकायच चक्राकारं भवेच्चक्रं पंचमाकारमथापि वा प्र
विष्टे भैरवे चक्रे सर्ववर्णा द्विजोत्तमः निवृत्ते भैरवे चक्रे तथा
सर्वे पृथक् पृथक् गतं च चक्रात्समायातं नत्वा नत्वा पुनः पुनः अ
न्यथा मरणं तस्य गतिः स्याद्यमसादनं अस्य चक्रं च रहस्यं स
चक्रं वा सकृत्सकृत् सभवेत्तारकापुत्रो वसंसिद्धीश्वरो भवेत्
अश्वमेधसहस्राणि वाजपेयशतानि च लक्षं वापि तडागानां
चक्रं दृष्ट्वा लभेत्फलं यो ददाति महादेव शक्तिभ्यः साधकाय
च कलामात्रेण देवेषु कोटिसंख्यमयं जपफलं उपवासं भूगोपात्त
संध्यासद्धनधारणं तीर्थपर्यटनं चैव कौलः पंचविवर्जयेत्
महापीठं व्रजेन्नित्यं न चेत्पीठमनन्तमम् तारापुरं महापीठं
गतमध्यतः सदा लक्षत्रयं जपेद्देवि सर्वसिद्धीश्वरो भवेत्
ईशाने चक्रनाथस्य वैष्णवनाथस्य पूर्वतः तारापुरं सिद्धमौतं
नगरं भविदुर्लभं तत्र यत्नेन गंतव्यं यत्र ताराशिवालयं इत्या
दिसंक्षेपः ॥ इति श्रीब्रह्मानंदपरमहंसपरिव्राजकाचार्यवि

रचिते तारारहस्ये तत्त्वादिरहस्यं ॥ अथ पूजा तथाचतारा
तिराणे तारासारे च आदौ जलेन संशोध्य क्षालनं हस्तपादयोः
मूलेन तिलकं कुर्यात् हि भस्मनां त्रिपुण्ड्रकं रक्तचंदनेनैकांवा
सिंदूरस्यापि वा पुनः ॐ मणिधरि वज्रिणि सर्ववशंकरि हूं फट्
स्वाहा इत्यनेन शिखां बध्वा ॐ ह्रीं स्वाहेति आचमनं गुरुः प्रथ
मं पूज्यो प्रहरद्वारमागत्य ॐ वज्रोदके हूं फट् स्वाहा ॐ इति जल
मधिष्ठाय ॐ विशुद्धधर्मगात्र सर्वपापाणि शमयाशेष वि
कल्पमपनीय हूं फट् स्वाहा इति हस्तौ पादौ च प्रक्षाल्य मूलेन
तिलकं विभूत्या त्रिपुण्ड्रं सिन्दूरगोरोचनास्यतमदीकां गृहीत्वा
ॐ मणिधरि वज्रिणि सर्ववशंकरि हूं फट् स्वाहा इति शिखां बद्ध्वा
ॐ ह्रीं स्वाहा इत्याचम्य ततः पीठं चिंतयेत्स्व कृतांजलिपरो भवे
त् आचमनं ततः कृत्वा सर्वसिद्धीश्वरो भवेत् वैरोचनादीन्विस
स्य भूमिं संशोध्य यत्नतः ततश्च भूमिं शोधयेत् आसनायस्तिको
णं संशोध्य आसनं पश्चात् सर्वविघ्नान्विनाशयेत् ततः प्रयोगः
पुष्पस्थानं तत्र विन्यस्य तत्र कल्पद्रुमं स्मरेत् तन्मध्ये मणिपीठं च ना
नामणिविभूषितं नानालंकारसंयुक्तं मणिदेवैर्विभूषितं शि
वाभिर्बहुमांसास्थिमोदमानाः समंततः चतुर्दिक्षु श्मशानं तु
चितांगारास्थिसंयुतं तन्मध्ये भावयेद्देवी यथोक्तध्यानयोगतः
ततश्चाचमनं ॐ उग्रतारायै स्वाहा ॐ एकजटायै स्वाहा ॐ
नीलसरस्वत्यै स्वाहा इत्याचम्य ॐ ह्रीं स्वाहा इति करौ संशोध्य व
ह्निबीजेन कूर्चेन गृहोपरि शोधयेत् पुनर्दक्षिणहस्तेन चाल
येत् मुखे ॐ वैरोचनाय नमः नासायां ॐ शंखपांडराय नमः
ॐ पद्मनाभाय नमः चक्षुषोः ॐ असितांगाय नमः ॐ लामका
य नमः कर्णयोः ॐ मामकाय नमः ॐ पांडराय नमः ॐ तारका

तारार
हस्य.
२२

यनमः हृदि ॐ पमांतकायनमः शिरसि ॐ यमांतकायनमः
वामबाहौ ॐ विघ्नांतकायनमः दक्षबाहौ ॐ नरांतकायनमः
इत्यात्मरक्षामंत्रं ॐ पवित्रभूमये हूं फट् स्वाहा इति तोयेन सृद्या भू
मिमभिमंत्र्य ॐ रक्ष रक्ष मां हूं फट् स्वाहा इति जलमेकांबुमिश्रं
क्षेप्य मत्रासनाधस्त्रिकोणं विलिख्य ॐ आः सुरेखे वज्ररे
खे हूं फट् स्वाहा इत्यासनमभ्यर्च्य ॐ ह्रीं आधारशक्तिकमला
सनायनमः इत्यासनमभ्यर्च्य ॐ सर्वविघ्नानुत्सारय हूं फट्
स्वाहा इत्यासनमभ्यर्च्य आसनं तारार्णवे कोमलं विष्टरं वा
पितुरंकं मृदुकं तथा शृष्मासां तगीतस्यापतनं मृदुरूपते च
तर्वभोतरालेचदृढकंचविथीयते पंचाशन्मुंडपत्रनिर्मितं
भस्मवालुकाभिः शोधितं सार्तितमिति ततश्चांडालिनीगर्भ
जातंच ब्राह्मणोरसात् ब्राह्मणीगर्भजातं वा चंडालस्यापि चोर
सात् कमलासनमित्युक्तं मंत्रसिद्धिप्रदायकं इत्यादिकमला
सनं संशोध्य ॐ सर्वविघ्नानुत्सारय हूं स्वाहा इति प्रच्छादनतो दे
पैर्विघ्नान्नाशयेत् दिवादृष्ट्यवलोकनेन खेचरान् वामपादघा
तत्रयेण भौमान् विघ्नानपसार्य — गणेशादीन् प्रणम्याद्यदृ
दिव्यं धनं चरेत् करौ च गंधपुष्पाभ्यां शोधयेत् तदनंतरं फडि
ति गंधपुष्पाभ्यां करौ संशोध्य तालत्रयं दत्वा छोटिकाभिर्द
शदिग्बंधनं चरेत् वह्निप्राकारं चिंतयित्वा कायवाङ्मनोविशो
धयेत् पुष्पं च शोधयित्वा तत्त्वशुद्धिं समाचरेत् ततश्च कर्त
र्त्यं ध्यात्वा मूलं शीर्षे जपेद्दश एकादश प्रजपन्मंत्रं प्रतिष्ठामंत्र
रेव च मातृकान्यासकं कृत्वा मातृकायाः षडंगकं करांगन्या
सकावाश्चयोनिहादशाकं न्यसेत् प्राणायामं ततः कुर्याद
ष्टादिन्यासमेवच ॐ मणिधरिवज्रिणि महाप्रतिसरे रक्ष रक्ष

हूं फट् स्वाहा इति वस्त्रांतरे ग्रंथिं बद्ध्वा ॐ श्रां हूं फट् स्वाहा इति वाक् वि
ग्नं विशोधयेत् ॐ पुष्पकेतुराजाईते शतायसम्यक्संबुद्धाय ॐ पुष्पे
पुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे पुष्पचयावकीर्णे हूं फट् स्वाहा
संशोध्य भूतशुद्धिं कुर्यात् स्वांकं उत्तानौ करौ कृत्वा हंसः इति कुं
डलिनीं जीवात्मानं चतुर्विंशति तत्वानि सुषुम्नावर्त्मना शिरो
वस्थितपरमात्मनि शिवे संयोज्य ह्रींकारं रक्तवर्णं नाभौ ध्यात्वा त
दुद्भूतेनाग्निना लिंगशरीरं संदह्य स्त्रींकारं पीतवर्णं हृदि विचिंत्य
तदुद्भूतेन वायुना भस्म प्रोत्सार्य हूंकारं श्वेतवर्णं शिरसि विचिं
त्य तदुद्भूतेनामृतेन तं भस्म प्लावितं कृत्वा तस्मिन् विश्वव्यापके
वारिणि आः काराद्रक्तपंकजं तदुपरि टीकारं श्वेतपंकजं तदुप
रि हूंकारं नीलसन्निभं तदुपरि स्त्रींभीजभूषितां मातृकां ध्यायेत् ॐ
प्रत्यालीढपदां घोरां मुंडमालाविभूषितां खड्गकर्त्रीसमायोगस
व्येतरभुजद्वयां कपालोत्पलसंयुक्तसव्यपाणियुगान्वितां पिंगो
ग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषितां अक्षोभ्यादरीमूर्द्धस्थि
मूर्त्तिं नागरूपधृक् चंद्रसूर्याग्निनयनां महापानप्रमत्तिकां इति
ध्यात्वा स्वशिरसि पुष्पं दत्वा नर्धचन प्रकारेण मानसोपचारैरा
ध्य नमस्कुर्यात् ततः स्वशिरसि ॐ श्रां ह्रीं क्लीं स्वाहा इत्येकादश
धा जप्त्वा इति प्रविहाय कृतांजलिः पंचाशल्लिपिभिर्विभक्त
मुखदोःपन्मध्यवक्षःस्थलां भास्वन्मौलिनिबद्धचंद्रशकलामा
पीनतुंगस्तनीं मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबु
जैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये इति मातृ
कां ध्यात्वा मातृकान्यासं कुर्यात् अं नमो ललाटे आं नमो
मुखे इं नमो दक्षिणनेत्रे ईं नमो वामनेत्रे उं नमो दक्ष

तारार
हस्य·
२३

कर्णे ऊंनमोवामकर्णे ऋंनमोदक्षिनसि ॠंनमोवामनसि
ऌंनमोदक्षगंडे ॡंनमोवामगंडे एंनमोऊर्द्ध्वोष्ठे ऐंनमोअधरे ओं
नमोऊर्ध्वदंते औंनमोअधोदंते अंनमोब्रह्मरंध्रे अःनमोमुखे
कंनमोदक्षबाहुमूले खंनमोकूर्परे गंनमःकवचे घंनमों
गुलिमूले ङंनमोऽगुल्यग्रे तथादक्षहस्तेन चं छं जं झं ञं
वामबाहुमूलचतुःसंध्यग्रेषु टं ठं डं ढं णं दक्षपादमूलच
तुःसंध्यग्रेषु तं थं दं धं नं वामपादमूलचतुःसंध्यग्रेषु
पं नमोदक्षपार्श्वे फंनमोवामपार्श्वे बंनमोपृष्ठे भंनमोना
भौ मंनमोउदरे यंनमोहृदये रंनमोदक्षस्कंदे लंनमोक
कुदि वंनमोवामस्कंदे शंनमोहृदादिदक्षकरे षंनमोहृ
दादिवामकरे संनमोहृदादिदक्षपादे हंनमोहृदादिवामपा
दे ळंनमोहृदादिउदरे क्षंनमोहृदादिमुखे ललाटेमुख
वृत्तेच वक्षसोः कर्णयोर्नसोः गंडयोरोष्ठयोर्वापि दंतपंक्त्योर्वि
शेषतः ब्रह्मरंध्रेपुनर्वक्त्रे अकारादीन्न्यसेद्बुधः तर्जनीमध्य
मायोगं अकारे विन्यसेद्बुधः मध्यमानामिकायोगान्मध्याह
क्षेन्यसेत्ततः मध्यमांगुष्ठयोगेन विन्यसेद्वक्षसोस्तथा अना
मांगुष्ठयोगेनकर्णयोर्न्यासनीयकं तर्जन्यांगुष्ठयोगेन नास
योगेपरिन्यसेत् अनामामध्यमायोगाद्गंडयोर्विन्यसेत्सदा अं
गुष्ठपर्वनान्यासः कर्तव्यश्चौष्ठयोरपि मध्यमाग्रसमादाय
दंतयोर्न्यसनीयकं अंगुष्ठाग्रंब्रह्मरंध्रे मुखेकरतलेविदुः
विद्याप्रद्रां समादाय हस्तयोःसाधकोत्तमः विन्यसेदुत्तप
येषु पार्श्वपृष्ठेचनाभितः हृदाकारतलेप्रोक्तं मातृकान्यास
कर्मणि कक्षादिस्कंदरोर्वापि पुनः सर्वत्रहस्तयोः ततोमूलेन

शिरआदिपादांतं पादादिशिरोंतं शिरआदिहृदयांतं हृदा
दिमुखांतं इतिव्यापकत्रयंकुर्यात् अकारादिपुटैर्वान्यसेद
गकरांगके अं कं खं गं घं ङं आं हृदयायनमः इं चं छं जं
झं ञं ईं शिरसेस्वाहा उं टं ठं डं ढं णं ऊं शिखायैवषट् एं
तं थं दं धं नं ऐं कवचायहुं ओं पं फं बं भं मं औं नेत्रत्रया
यवौषट् अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलपृष्ठा
भ्यां अस्त्रायफट् अं कं खं गं घं ङं आं अंगुष्ठाभ्यांनमः इं चं
छं जं झं ञं ईं तर्जनीभ्यांनमः उं टं ठं डं ढं णं ऊं मध्यमा
भ्यांवषट् एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं ओं पं फं बं
भं मं औं कनिष्ठाभ्यांवौषट् अं यं रं लं वं शं षं सं हं ळं क्षं अः
करतलपृष्ठाभ्यांअस्त्रायफट् योनिद्वादशविद्यांच विन्यसे
त्साधकोत्तमः मूर्ध्निवक्त्रेतथाकंठे हृदयेउदरेतथा नाभावा
धारपद्मेच पदोर्बाह्वोश्चसर्वतः योनिर्वेद्यायोनिनित्यायोनि
रूपालयैवच योनिमध्यायोनिसिद्धा योनिक्रमाचयोनिदा
योनिहायोनिसाध्याच योनिस्नानाचयोनिपा योनिपूर्णात
थान्यासस्सर्वतंत्रसिद्धये स्वगमुद्रया मूर्ध्नि ओं योनिर्वेद्या
यैनमः वक्त्रे ओं योनिनित्यायैनमः कंठे ओं योनिरूपायैनमः
हृदये ओं योनिमध्यायैनमः उदरे ओं योनिसिद्धायैनमः नाभौ
ओं योनिक्रमायैनमः मूलाधारे ओं योनिदायैनमः दक्षपा
दे ओं योनिहायैनमः वामपादे ओं योनिसाध्यायैनमः दक्ष
बाहौ ओं योनिस्नानायैनमः वामबाहौ ओं योनिरूपायैनमः
सर्वांगे ओं योनिपूर्णायैनमः इति विन्यसेत् इतिद्वादशयो
निन्यासः दक्षहस्तांगुष्ठेन दक्षनासापुटं धृत्वा मूलेनोक्त

तारार०
हस्य०
२४

वामं नसा वायुं पूरयेत् ततो नासापुटौ धृत्वा चतुःषष्टिवारं ज
पेत् कुंभयित्वा वामनासायां कनिष्ठानामिकाभ्यां धृत्वा द्वा
त्रिंशद्वारं जपेत् दक्षिणेन रेचयेत् पुनर्दक्षिणेनापूर्य वामे
न रेचयेत् कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं प्राणा
यामः स विज्ञेयः पूरककुंभकरेचकैः इत्येवं वारत्रयं कुर्या
दिति प्राणायामः शिरसि ॐ अक्षोभ्यऋषये नमः मुखे ॐ
बृहस्पतिच्छंदसे नमः हृदि श्रीमत्तारायै एकजटायै देवतायै न
मः मूलाधारे हूं बीजाय नमः पादयोः फट् शक्तये नमः स
र्वांगे निजबीजकीलकाय नमः इति ऋष्यादिन्यासः पी
ठन्यासं ततः कृत्वा पीठशक्तिर्न्यसेत्ततः तत्त्वन्यासं विधाया
थ बीजन्यासं समाचरेत् करांगं च षडंगं च न्यस्त्वा वर्णांश्च न्यसे
त्ततः संशोध्य यंत्रं देहे तु पीठपूजां समाचरेत् गणेशं बटुकं
चैव क्षेत्रपालं च योगिनीं पीठपूजां ततः कृत्वा पीठशक्तिं प्र
पूजयेत् षोढां कृत्वा ततो मंत्री अर्घ्यं कृत्वा च तन्मनः स्थाप
कं पंचधा कृत्वा पूजयेत्सर्वदेवताः हृदि हस्तं दत्त्वा मृगमुद्रया
न्यसेत् सकेशरेषु ॐ श्मशानाय नमः ॐ कल्पवृक्षाय नमः
ॐ मणिपीठाय नमः ॐ नानालंकारेभ्यो नमः ॐ मुनिभ्यो
नमः ॐ देवेभ्यो नमः ॐ बहुमांसास्थिमोदमानशिवाभ्यो
नमः चतुर्दिक्षु ॐ शवमुंडचिताङ्गारास्थिभ्यो नमः इति पी
ठन्यासः हृदि ॐ लक्ष्म्यै नमः ॐ सरस्वत्यै नमः ॐ प्रीत्यै नमः
ॐ कीर्त्यै नमः ॐ शान्त्यै नमः ॐ तुष्ट्यै नमः ॐ पुष्ट्यै नमः इ
ति पीठशक्तिन्यासः ॐ आत्मतत्त्वाय स्वाहा इति आधारादि
हृत्पर्यंतं ॐ विद्यातत्त्वाय स्वाहा इति हृदादिभ्रूमध्यपर्यंतं

ॐ शिवतत्त्वाय स्वाहा इति ब्रह्मरंध्रांतं इति तत्त्वन्यासः मंत्रं
पंचखंडं कृत्वा ब्रह्मरंध्राल्ललाटांतं आद्यबीजं नमोन्तं न्यसे
त् ललाटान्मुखांतं द्वितीयबीजं नमः मुखात्कंठं तृ
तीयबीजं नमः कंठाद्धृदयांतं चतुर्थवर्णं नमः हृदयान्मू
लांतं पंचमवर्णं नमः इति बीजन्यासः ह्रकारं ब्रह्मसंयुक्तं ष
ष्ठदीर्घेण समन्वितं चंद्रखंडयुतं कृत्वा विन्यसेत्साधकोत्तमः
एकजटा तारिणी च न्यसेद्वज्रोदका तथा उग्रजटा ततो न्य
सेन्महाप्रतिसरा तथा पिंगोग्रैकजटा पश्चात् करांगेषु षडं
गतः तथा ह्रां एकजटायै अंगुष्ठाभ्यां नमः ह्रीं तारिण्यै तर्ज
नीभ्यां स्वाहा हूं वज्रोदके मध्यमाभ्यां वषट् ह्रैं उग्रजटे अना
मिकाभ्यां हुं ह्रौं महाप्रतिसरे कनिष्ठाभ्यां वौषट् ह्रः पिंगो
ग्रैकजटे करतलपृष्ठाभ्यां अस्त्राय फट् इति करांगन्यासः ।
ह्रां एकजटायै हृदयाय नमः ह्रीं तारिण्यै शिरसे स्वाहा हूं व
ज्रोदके शिखायै वषट् ह्रैं उग्रजटे कवचाय हुं ह्रौं महाप्रतिस
रे नेत्रत्रयाय वौषट् ह्रः पिंगोग्रैकजटे करतलपृष्ठाभ्यां अस्त्रा
य फट् इति षडंगन्यासः अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं
ओं औं नमो हृदि अं अः कं खं गं घं नमो दक्षबाहौ ङं
चं छं जं झं ञं टं ठं डं ढं नमो वामबाहौ णं तं थं दं धं नं
पं फं बं भं नमो दक्षपादे मं यं रं लं वं शं षं सं हं ळं क्षं
नमो वामपादे ततः श्रीमदेकजटायंत्रं उद्धृत्य संस्कुर्यात्
ॐ आः सुरेखे वज्ररेखे हूं फट् नमः इति योनिमुद्रां प्रदर्श्य
यंत्रं शोधयेत् ततः पूजामारभेत् पूर्वादितः ॐ ह्रीं गां गण

तारार
हस्य·
२५

पतयेनमः दक्षिणे ओं ह्रीं वां वटुकायनमः पश्चिमे ओं ह्रीं क्षं क्षे
त्रपालायनमः उत्तरे ओं ह्रीं यां योगिनीभ्योनमः पीठस्यास्वसी
ठपूजां कृत्वा पूर्वाद्यष्टदले पीठशक्तिं संपूज्य मध्ये सौः सदाशि
वप्रेतपद्मासनायनमः ततः स्ववामे बिंदुमध्यत्रिकोणवृत्तचतु
रस्रमंडलं कृत्वा तत्र श्रीमदेकजटादेव्यै अर्घ्यस्थानायनमः त
त्र त्रिपदिकामाधाय जलेनाभ्युक्ष्य फडिति पात्रं प्रक्षाल्य तत्र सं
स्थाप्य श्रीमदेकजटादेव्यै ओं अर्घ्यपात्रायनमः ततो मूलेना
पूर्य रक्तचंदनबिल्वपत्रदूर्वाक्षतादीन्निक्षिप्य विलोममातृ
कावर्णैर्मूलेन च विन्दुक्रमस्तथामयजलेन शावमापूर्य
तत्र गंगे चेत्यादिनांकुशमुद्रया तीर्थमावाह्य वं इति धेनुमुद्रया
अमृतीकृत्य योनिमुद्रां प्रदर्श्य मत्स्यमुद्रयाच्छाद्य तत्र देवीं
ध्यात्वा पुष्पांजलिं दत्वा षडंगानि विन्यस्य मूलं तत्र दशधा ज
प्त्वा तज्जलैः पुष्पादिना आत्मानं पूजोपकरणं चाभ्युक्ष्य पंचार्घ्यं
कृत्वा पंचधास्थापकं कृत्वा देवीं ध्यायेत् ध्यायेत् श्रीतारकां देवीं
करकच्छपमुद्रया विशेषतः फलार्थी च ध्यायेद्योनिमुद्रया
प्रत्यालीढपदार्पितांघ्रिशिवहृद्घोराट्टहासा परा खड्गेन्दीवर
कर्त्रिखर्परभुजा हूंकारबीजोद्भवा खर्वा नीलविशालपिंगल
जटाजूटैकनागैर्युता जाड्यं न्यस्य कपालके त्रिजगतां हंत्युग्र
तारा स्वयं इति ध्यात्वा यंत्रे तत्स्पंदत्वा ध्यानरहस्यं विभाव्य आ
वाहयेत् यथा सर्वामभिनवजलधरनीलां लंबोदरीं व्याघ्र
चर्मावृतशोभितकटिं पीनोन्नतपयोधरां रक्तवर्तुलनेत्रत्रयां
दृष्टिनीलजटाजूटां श्रीअक्षोभ्यमहादेवकृतनागफणाविशो

भितां पार्श्वद्वये लंबमाननीलोत्पलमालां पंचमुद्रास्वरूप
शुभ्रतिकोणाकारकपालपंचतमात् अतिनीलजटाजूटां
विस्तीर्णचमरिकाकेशाईव महाविगलितचिकुरां शुभ्र-
णितलकनागकृतकंकणां रक्तवर्णनागकृतसत्यहारां
चित्रितवर्णशेषनागकृताहारां स्वर्णवर्णस्वल्पनागपादांग
रीयकां ईशाक्षनागकृतकटिसूत्रां हरिद्दलश्यामलना
गकृतवलयां चंद्रसूर्यवह्निकृतनेत्रत्रयां कोटिकोटिबा
लार्कविद्युद्विकृतदक्षिणनेत्रां कोटिकोटिबालचंद्रकृतवा
मनेत्रां ललनवदहनकृतऊर्ध्वनेत्रां ललजिह्वां महाका
लशवरूपहृदयस्थितसंकुचितदक्षिणचरणां शवपादद्वय
स्थितप्रसारितवामचरणां प्रत्यालीढपदां सद्यश्छि
न्नगलरुधिरश्रोतकेशग्रथितमुंडमालावलीरम्यां सर्व
अलंकारशोभितां महामोहविमोहिनीं महामानविदा
यिकां विपरीतरताशक्तां रत्यावेशस्मेराननां दक्षिणहस्ता
भ्यां घृतकर्त्रिकां तदूर्ध्वे ललच्चंद्रहासखड्गधरां वामोर्ध्वसर्वशि
क्षाणां भयहरणाय आसवगलितनीलोत्पलकिंचिकस्मेर
कनागधरां तदधः कपालचषकसयः कुं कुंभशोभितभुजां
हूंकारबीजोद्भवां सर्वब्रह्मांडानांकर्त्री तपयंत्री षोडशाब्दां
सर्वज्ञानविदायिनीं ध्यात्वा वाहयेत् ओं देवेशि भक्तिसुलभे प
रिवारसमन्विते यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव इ
त्या कृतांजलिना श्रीमदेकजटे देवि इहागच्छागच्छ अधो
मुखांजलिना इह तिष्ठ तिष्ठ गर्भांजुमुद्रिकया इह सन्निधेहि
सन्निधेहि तदधोमुखेन इह संनिरुद्ध स्वहस्तं भ्रामयित्वा अत्र
धिष्ठानेऽक्रम मम पूजां गृहाण आकारं बिंदुसंयुक्तं मायापाश

तारा
रहस्य
२६

विभूषितं वह्निजायावहंसांतः प्रतिष्ठामंत्र इति: आं ह्रीं क्रों
स्वाहा हंसः श्रीमदेकजटादेवतायाः प्राण इह प्राणाः एवं
जीव इह स्थितः एवं सर्वेन्द्रियाणि इह स्थितानि एवं वाङ्मन
श्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इम
नामोगुह्यं संपुटक्रमेण प्रतिष्ठापयेत् ततो मूलं दशधा जप्त्वा
येन् योनिमत्स्याकूर्मशङ्खवज्रमृगमालिनीमुद्राः प्रदर्श
श्रीमदेकजटे देवि वज्रपुष्पं प्रतीच्छ हूं फट् स्वाहा इति पुष्पां
जलीन्दत्वा पूजयेत् आसनं स्वागतं पाद्यमर्घ्यमाचमनीय
कं मधुपर्काचमनं स्नानं वसनाभरणानि च सुगंधिकुसु-
म धूपदीपनैवेद्यवंदनं दशोपचारैर्वा पंचोपचारैर्वा पूजये
त् पुरुषविधया सहस्तितिमत्वा ॐ वज्रपुष्पं प्रतीच्छ हूं फट् स्वा
हा इत्युच्चार्य पूजयेत् एतत्पाद्यं नमः पाद्यं गृहीत्वा तदुपरि
पूजामंत्रं एकजटादेवतायै एतत्पाद्यं नमः इति रुतमुष्टि
प्रसारितां गृहीतं जनीं भ्रां दद्यात् तथा इदमर्घ्यं स्वाहा पाद्यं च
पादयोर्दद्यात् मौलौ चार्घ्यं निवेदयेत् गंधं वा लेपयाश्च पुष्पं प
दयोश्च निवेदयेत् इदं स्नानीयं स्वधा मृगमुद्रया गंधोयं नमः
अंजलिना पुष्पाणि वौषट् ततः स्ववामे घंटां चानीय गंधपुष्पा
भ्यां ॐ जयध्वनिमंत्रमातः स्वाहा इति घंटां संपूज्य धूपपात्रं
परिसंस्थाप्य पूजामंत्रं जप्त्वा वामहस्तेन धृत्वा एष धूपः स्वधा
इति निवेद्य मृगमुद्रया नीत्वा वामहस्तेन घंटां वादयन् आ
नासामुखतो धूपसमीरणं चापयेत् तथा दीपोयं स्वाहा दृष्टि
पर्यंतं दीपं दत्वा निराजयेत् तथा मत्स्यं मालादिकं देयं स्व
वामे त्रिकोणं विलिख्य तत्र नैवेद्यमानीय इति येन मुद्रया
मृतीकृत्य योनिमुद्रां प्रदर्श्य तत्र मूलं दशधा जप्त्वा फडिति

अस्त्रेण संरक्ष्य गालिनीमुद्रां प्रदर्श्य वामहस्तानामिकांगुष्ठा
भ्यां धृत्वा सर्वोदकेन एतन्नैवेद्यं सोपकरणं श्रीमदेकजटा
देव्यै नमः सौम्यद्विनारस्य ॐ अमृतोपस्तरणमसि स्वाहेति
जलं दत्वा वामहस्तेन ग्रासमुद्रां बध्वा दक्षहस्तेन प्राणादिमु
द्राः प्रदर्शयेत् ततः प्राणार्थं जलं ततस्ताम्बूलं चुलुकादि
कं च समर्पयेत् ॥ ततः घंटावाद्यैः तथा यथाशक्त्युपचारैः
संपूज्य योनिमुद्रां प्रदर्श्य देविम् आज्ञापय परिवारांस्ते पू
जयामि इत्युक्त्वा षडंगानि संपूज्य देव्या मौलौ ॐ अक्षोभ्य
भैरव वज्रपुष्पं प्रतीच्छ हूं फट् स्वाहा इत्यादिना सर्वत्राभ्यर्च
येत् देव्या दक्षहस्तोर्ध्वे खड्गं तदधः कर्तृकां वामोर्ध्वे इन्दी
वरं तदधः खप्परं कृतशिवः सहितच सकं संपूज्य वायव्यां
शिवकोणपर्यंतं गुरुपंक्तिं च पूजयेत् ऊर्ध्वकेशव्योमके
शनीलकण्ठवृषध्वजाः तत्रानन्दनाथास्तान् पूजयित्वा
फलं लभेत् तारावती भानुमती जयाविद्यामहोदरी अ
म्बिकाः पूजयेदेताः इष्टमोक्षार्थसिद्धये वशिष्ठमीननाथ
श्च हरिनाथकुलेश्वरौ विरूपाक्षमहेश्वरस्तथा पारिजाताः
महाकालरुद्राणी उग्रा भीमा घोरा भ्रामरी कालकर्त्री
विश्वरूपा च ॐ ऊर्ध्वकेशानन्दनाथ वज्रपुष्पं प्रतीच्छ हूं
फट् स्वाहा एवं व्योमकेशानंदनाथ - नीलकंठनंदना
थ - वृषध्वजानन्दनाथान् एवं तारावत्यम्ब - भानुमत्यम्ब
जयावत्यम्ब - विद्यावत्यम्ब - महोदर्यम्बाः - तथा वशिष्ठान
न्दनाथ - मीननाथानन्दनाथ - हरिनाथानन्दनाथ -
कुलेश्वरानन्दनाथ - महेश्वरानंदनाथ - स्वानन्दना
थ - पारिजातानन्दनाथान् - तथा महाकालरुद्राण्यम्ब-

तारार
हसं
२७

उग्रेव · भीमास्य · घोरास्य · भ्रामर्य्यास्य · कालरात्र्यास्य - वि
श्वरूपास्याः ततः पूर्व्वादिवामावर्त्तेनाष्टदले पूजयेत् ओं वि
रोचनवज्रपुष्पं प्रतीच्छ हूं फट् स्वाहा एवं शङ्खपांडुर पद्म
नाभ अप्सिताग नामक पांडुर तारक यमांतक वज्रपुष्पं
प्रतीच्छ हूं फट् स्वाहा इति पूर्व्वद्वारे तथा उदीच्यां यमांतक
पश्चाद्विघ्नांतक दक्षिणे नरांतक एतान्सम्पूज्य पंचपुष्पां
जलीन्दत्वा पाद्यार्घ्यादिना देवीं संपूज्य वामे त्रिकोणं षट्
कोणं वृत्तं चतुरस्रं विलिख्य तत्र विभरितस्याधारपात्रं स
मांसतण्डुलदधिहरिद्रादग्धमीनास्वपिष्टाकलवण
ईकान्यतमं गृहीत्वा दक्षहस्तेन जलं नीत्वा ओं ह्रीं श्रीमदे
कजटे देवि मयोपनीतं वलिं गृह्ण गृह्ण गृह्णापय गृह्णा
पय मम शांतिं कुरु कुरु परविद्यामाकृष्याकृष्य त्रुट
त्रुट छिंदि छिंदि भिंदि भिंदि सर्व्वजगद्वशमानय ओं
ह्रीं स्वाहा इति त्रिः पठित्वा वलिं दद्यात् यद्यं का कालिकाक
ल्पे वलिं स्वतनुशोणितं तत्सर्व्वकलिकार्त्थायां नतथा,
विधेयकवित् स्वगात्ररुधिरं यत्तु तारकायै प्रदीयते तस्य
रुद्धाः सदा तारा न पूजाफलमाप्नुयात् त्रिकोणं चाष्टको
णं च वृत्तं कोणचतुष्टयं वलिदाने विदेस्थानं शास्त्रेता
रकार्च्चने ओं ह्रीं एकजटे स्फुट्का देवीति तदनंतरं महायक्षा
धिपतये मयोपनीतकं पद्यं वलिं चोक्त्वा ग्रहस्वयुग्मं श्राव
येत्तदनंतरं गृह्णापयपदद्वन्द्वं मम शांतिं समावरेत् कुरु
द्वयं परविद्यामाकृष्याकृष्य एव च त्रुटयुग्मं वदेत्पश्चात्
छिंदियुग्मं ततः परं भिंदियुग्मं समुच्चार्य सर्व्वजगद्वश
मानय लज्जातारं समुच्चार्य वलिं दद्यात्पठेत्त्रयं ततः पुन

रर्घ्यं कृत्वा ओं ह्रीं गैं श्रीमदेकजटे देवि मम सर्व्वविद्यासिद्धय सि
द्धय गृहाणार्घ्यं सर्व्ववाचस्पतित्वं देहि स्वाहा इत्युक्त्वा जय जय
इत्युक्त्वा नीराजनपुरःसरं देव्यामौलौ दत्वा यथाशक्ति जप्त्वा सम
र्प्य जलं देव्या वामहस्ते दद्यात् ततस्तत्कवचादिपाठः सर्व्वत्र
कुलक्रियादिपूर्व्विका ततः प्रदक्षिणं कुर्य्यात् चेदागायपुरः
सरं कुर्य्याद्दक्षिणकं हस्तं कृत्वा वारत्रयं नरः याम्याञ्च वायव्यां
गच्छेत् स्थित्वा किंचिद्वर्णकरी प्रतीच्यां प्रगत्वा तु प्रणमे
त्पुरः स्थितः प्रणमेत्समवारं तु त्रिः प्रकुर्य्यात्प्रदक्षिणं दं
डाकारे निपत्याष्टकाः फली भूमिमध्यतः अंगुल्यानां च अ
ग्राणि एकीकृत्वा स्वमानसः त्रिकोणकारमादाय किंचिद्वा
मांशतोनमेत् उरसा शिरसा पश्चात्पाणिभ्यां जानुतस्तथा ना
सा चिबुकयोगेन प्रणम्य सिद्धिमाप्नुयात् अथ जपक्रमः कु
लुकां प्रजपन्मूर्ध्नि दशधा जपसिद्धये मन्त्रसेतुं सप्तधा च प्रण
वं ण पुटं हृदि प्राणायामः पुरः पूर्व्वं जपेत्साधकसत्तमः कु
ल्लुका यथा स्वद्वितीयं वद्राफ्लं लज्जावाक्च शिवएव च श्रौं ह्रीं क्रीं
इति शिरसि दशधा जपेत् मन्त्रसेतुं ओं इति सप्तधा जपेत् हृ
दि प्रणवपुटितमंत्रं सप्तधा जपेत् सर्व्वत्रादौ प्राणायामः त
तः सेतुं ततो महासेतुं ततो मंत्रशिखा ओं ओं इति सप्तधा ज
पेत् ततो मंत्रप्राणं कलवीम् इति सप्तधा ततः सहस्रं अ
ष्टोत्तरशतं विंशतिं वा जपेत् ततो जलपुष्पं करतलेनीत्वा
ओं गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे
देवि त्वत्प्रसादान्महेश्वरि इति जपं देव्या वामहस्ते समर्पयेत्
ततः प्राणायामः इति जपक्रमः काम्यजपः पुरश्चरणप्रक

तारार
हस्य.
२८

रणेवक्रमः नित्यजपेनियमं प्रत्यापव सहस्रं प्रजपेन्मंत्रं धर्म
मोक्षार्थसिद्धये अष्टोत्तरशतंयद्वतन्नजापाफलाप्तये विंश
तिंचजपेन्मंत्रं पूजासिद्धार्थमेवहि पूजनेतरजपेनासारे या
वत्क्रियतेकर्मपुरश्चरणमुत्तमं तावन्नैवप्रजपेत्सहस्रा
दधिकंशिव प्रजपेत्साधकोयस्तु लोभयुक्तो ध्यानमधीः सह
स्रादधिकंवत्स सहस्रेषु समर्पयेत् पनेनपुरश्चरणहीनः सह
स्राद्यर्धंनजपेत् यदेकदायुतं जपेत्तदासहस्रं सहस्रंजप्त्वा स
मर्पयेत् सहस्रंप्रजपेन्मंत्रंपुरश्चरणकर्मणि शतंतेनप्रजप
म्यं ह्यधिकंनकदाचन ततोर्घजलंनीत्वा ॐइतः पूर्वंप्राणबु
द्धिदेहधर्माधिकारतो जपेत्सम्प्रसुप्तावस्थासु मनसावा
चाकर्मना हस्ताभ्यां पद्भ्यामुदरेणशिश्ना यत्स्मृतंयदुक्तंय
त्कृतंतत्सर्वंब्रह्मार्पणंभवतु मां मदीयं सकलं सम्यक् श्रीमदे
कजटादेवतायै सर्वंसमर्पितमस्तु — ततः संहारमुद्रयात
मसेतिविसृज्य ईशान्यांत्रिकोणे ॐ उच्छिष्टचंडालिन्यै नमः
ततस्तेन यंत्रलेपनचंदनेनटीकापादादिकं नैवेद्यं किंचित्स्वी
कृत्यान्यच्छक्तिभ्यो दत्वायथेच्छंविहरेदितिएकजटापूजाप
द्धतिः प्रत्यालीढपदां देवीं महामायांत्रिलोचनां सर्वालंका
रभूषाढ्यां महानीलप्रभांपरां खड्गांपाशं दक्षिणेच वामेन्दी
वरमूर्द्धतः दधतस्त्रकंदेवां भावयेत्साधकोत्तमः इतिध्याना
तत्कल्पोक्तयंत्रे घोरहासांमहादेवीं तारिणीं तत्स्वरूपिणीं चम
केन्दीवरंचैव खड्गं चापिदरंतथा व्याघ्रचर्मपरीधानांसर्वालं
कारभूषितां वत्समानागहारांच महायोगस्वरूपिणीं इतिध्या
त्वावाद्यपूर्ववत्सर्वं इतिकामतारा अथतारा प्रकारणेऽक्षयंत्रे

यत्रतत्रलक्ष्मादिपीठपञ्चकयः अत्रतत्रकिंतु इच्छातानन्त्रि
याख्यापिकामिनीकामदायिनी रतिं रतिप्रियांचैव रतिदांप
रिपूजयेत् शवोपरिमहादेवीं शवेशहास्यसंयुतां विपरीत
रताशक्तां उग्रतारांपरांपरां कर्तृकांखड्गसंयुक्तां दक्षिणेता
रिणीपरां वामभागेनीलपद्मं चषकंतदधःस्तनं मुंडमा
लावलीरम्यांवक्त्रधाराविभूषितां घोरहास्यांत्रिनेत्रांच स
र्वदानानदायिनीं एकवेणीमहावेणी फणिराजविभूषितां
स्वर्णमुकटैर्शोभांराजतेदंतकंटकां इतिध्यात्वापूर्ववत्र
उग्रतारा शम्भुपत्नीमहाकालप्रियागणैःप्राणायामः
वेदकल्पावस्थमंत्रयुतं ध्यानविशेषः — नीलवाणीसदाव
न्देनीलांजनचयप्रभां स्वलंकारसमोपेतांव्याघ्रचर्माहतां
कटौ नागेनावेष्टितां देवीं फणिहारविधारिणीं फणिमस्त
कयोगेन दक्षिपादप्रपंचितं वामपादंशवेनाभोरसुल्लास
हृदान्वितां नामसीनरसीविश्वमोहिनीघोरकामिनीं शि
वंवक्त्रस्थभ्रमरोत्प्रत्यालीढपदांशुभां चमरीकेशसंस्कारस
दागलितकुंतलां नानामणियुतांशीर्षेमहापापविनाशि
नीं कपालंचापिखड्गंच नीलपद्मांसरस्वतीं भावयेत्सर्वसि
द्ध्यर्थंनीलवाणीकपि···दां एवंध्यात्वासर्वंपूर्ववत् यंत्रस्याष्ट
दलपद्मखड्गदण्डपाशकपालशूलगदापद्मचक्रपतास्रज
येत् इतिविशेषः इतिपूजनं नीलसारदायाः महानीलसर
स्वत्यास्तु ततोयथाशक्तिनित्यहोमः तथानिगमे — एकपा
श्वाहमियस्तुतारकायैप्रदीयते कोटिजन्मकृतं पापं तत्क्षणादे
वनश्यति ततोवसिदानं छागंवामहिषंवापिसूकरंवापत
त्रिणं हस्तिनंमूषकंवापिमार्जारंचापिचांडजम् दत्वादेवैम

तारार.
हस.
५९

हादेवेसमभवेत्कुलनायकः बलिंपुरतआनीयपोनिमुद्दांप्रद
र्शयेच दक्षिणेतत्कलं दत्वावामहस्तेनियोजयेत् श्रीमदेकज
टादेविबलिंगृह्णसतोन्नमे मंत्राणांचापिमेसिद्धिं लताविद्धिं
वदेहिमे ॐ ह्रीं ह्रां हूं पैं पैं सर्वसिद्धिप्रदेमेचतुर्वर्गसिद्धिं दे
हि देहि बलिंगृह्ण गृह्ण स्वाहा इतिनिवेद्य त्वकं नलपुष्पा
दिनासंपूज्य पकचातेनछेदयेत् इतिबलिदानं आसवंसं
विदांचापिनिवेद्यानन्दमाचरेत् तदापूजाप्रकर्तव्यासम
यानिष्फलाभवेत् संविदांवतर्याविमज्य प्रथमेतत्वमुद्रया
ॐ सम्विदेब्रह्मसंभूतेब्रह्मपुत्रिसदानघे भैरवाणांचतृप्त्यर्थंप
वित्राभवसर्वदा ॐ ब्राह्म्यैनमः स्वाहा इतिभूमौक्षिपेत् ॐ सि
द्धिमूलकरेदेविहीनबोधप्रबोधिनि राजप्रजावशकरिशत्रु
कंटत्रिशूलिनि ऐं वतृयायैनमः ॐ नमस्तामिनमस्तामिगो
गमार्गप्रदर्शिनि त्रैलोक्यविजयेमातःसमाधिफलदाभव
ॐ ह्रीं वैष्णव्यैनमः ॐ अन्तानेन्दनदीमाग्रेज्वालाग्निव्रह्मरूपि
णि आनन्दस्याकृतिंप्रीतिंसम्यगस्मानंप्रयच्छमे क्लीं सदा
यैनमः स्वाहा ततस्तन्मध्येत्रिकोणंविलिख्य ॐ अमृतेअ
मृतोद्भवे अमृतवर्षिणि प्रिये अमृतमाकर्षयाकर्षय स्वाहा
ततस्तत्वमुद्रयापूर्ववत्तर्पयेत् ततोभूमौकिंचित्क्षिप्य पैं पैं
वद वद वाग्वादिनि ममजिह्वायां स्थिरीभव सर्वशत्रुक्षयं
कुरु कुरु स्वाहा इत्यनेनतत्वमुद्रयादिति यत्रास्तिकमलाकृता
ञ्जलिपरावीणाधरा सारदा ताराचाक्षमनुस्मरंस्थितमंचो
मावचः कारणं ब्रह्मानन्दकृतोमसाधनविधौ तारारहस्ये
भेष्याचाराधिविधौ तृतीयःपटलः सर्वार्थसिद्धिप्रदः॥ —
अथबोधः प्रणवंमातृकावर्णैःपठितंमातृकास्थले तेनैवप

ठितंवर्णन्यसेत्तत्रैवपार्वति इतियामले केवलांमातृकांकृत्वामा
तृकांतारसंपुटं ताराणपुटितांतांतुलतांतमातृकापुटे लतया
पुटितामातन्यसन्न्यासाथकोन्नमैः मातृकयापुटोयोवायोवया
मातृकातथा मातृकयापुटंकूर्चंकूर्चेणपुटितांचर्णाताम मात
कापुटितेचास्त्रंस्त्रंमातृकयातथा मातृकापुटितंमंत्रंमंत्रेण
पुटितांततो अपुतंविन्यसेयस्तवापुर्कतकयोगतः महायोगी
भवेत्सोपिदेवीपश्यतिवत्सखा बोधहीनस्यमंत्रस्यकुर्वलतं
प्रजायतेनसिद्धिदोभवेत्सोपिमोक्षदोनकदाचन श्रं तारं श्रं
ॐ श्रं नमः ॐ श्रं ॐ नमः स्त्रीं श्रं स्त्रीं श्रं नमः स्त्रीं श्रं नमः
स्त्रीं श्रं नमः श्रं ह्रीं श्रं नमः ह्रीं श्रं ह्रीं नमः श्रं हूं श्रं नमः हूं श्रं
हूं नमः श्रं फट् श्रं नमः फट् श्रं फट् नमः श्रं मूलं श्रं नमः
मूलं श्रं मूलं नमः श्रं नमः श्रं लज्जा श्रं नमः लज्जा श्रं लज्जा
नमः श्रं वधू श्रं नमः श्रं कूर्चं श्रं नमः कूर्चं श्रं कूर्चंनमः
श्रं फट् श्रं नमः फट् श्रं फट्नमः श्रं मूलं श्रंनमः मूलं श्रं
मूलं नमः इतिवायुधारणेनन्यस्तामूले समथाव्यापकंकु
र्यात् इतिपूर्वबोधः ह्रीं पैं हौं क्लीं हूं फट् स्वाहा लज्जाबा
ग्भवबीजंच प्रसादंकामएवच वधूबीजंततोप्यस्त्रं न्यस्तसि
द्धिमवाप्नुयात् इतिमहाबोधः सं सं समावतिस्वाहा इतिमं
त्रंजपेदश वर्णन्यासक्रमेणैव माययापुटितावधूः वधूमं
पुटितात्वर्णान्विन्यसेत्साधकोत्तमः षड्धान्यासंततः कृ
त्वामहासिद्धिमवाप्नुयात् इतिपूर्ववत्पुटितंकृत्वा वर्णन्यास
वरुंचाप्यन्यस्थानेषड्धान्यसेत् इतिमहाबोधः प्रत्यहंक्रियते
येनबोधावन्यमहामहा मंत्रसिद्धिर्भवेत्तस्य स्वयंवाक्यस्य
तिहि इतिब्रह्मानंदपरमहंसपरिव्राजकाचार्यविरचितेताप

तारार
हस्य
३०

रहस्ये त्रिषोढाप्रकरणं षोढान्यासं मत्स्यमांसपरमान्नादिभिर्भो
गोदयः सायंसंध्यां ततो कृत्वा योगं परिप्रकल्पयेत् आधार
मूलं ग्रीवाग्रमेकदण्डं प्रकीर्तितं तदाश्रित्य वसेत्लोके कोटि
तीर्थत्रयं ततो वामे तदेशनाडी स्यात् इडा सर्वार्थसिद्धिदा द
क्षिणे पिंगलानाडी सर्वतीर्थमयी शुभा सुषुम्नामेरुपृष्ठतः पु
ण्यनाड्यखिलप्रदा तन्मध्ये चित्रिणी वज्रा तन्मध्यमध्यतः स्व
तः ब्रह्मनाडी समाख्याता ब्रह्मानंदप्रदायिनी इन्दीवरमृणा
लीवत् जन्ते मध्यमध्यतः स्थिरश्वासमायोगात् तिष्ठेत्सैव चरा
चरं सताव कुंडली शक्तिर्नीसा वायुः प्रकीर्तितः मायायोग
समायोगात्सर्वथा माहूस्थिता निवै बिल काकार रंजतं यथा
भाति वितष्ठति चैतन्यरहिता तासां वहानि द्युतिदेहतः तीर्थ
मुख्यं महापीठं तदाश्रित्य वितिष्ठति येत्रैव देवतास्तत्र अम्बुला
वलता यथा मेरोमूले यथा पद्मं मूलाधारं प्रकीर्तितं चतरंगु
लविस्तीर्णं उच्छितेचतरंगुलं चतुःपर्णं शोणपर्णं त्रिकोणं
कर्णिका ततः तन्मध्ये विंदुरूपो हि काकिनी शक्तिसंयुता स्व
यम्भूलिंगमाख्यातं स्वर्णवर्णं सुशोभनं यत्पंचकमानस्त
महालिंगं मनोहरं विवेष्ट्यित्वा विहरेत् शक्तिः कुंडलिनी
परा विलोलभुजगाकारा ब्रह्मरूपविधारिणी सार्द्धत्रिवलया
कारा महायोगमयी सदा षट्पदेव प्रोच्यमाना नैव लिंगस्व
पोत्कचित् सूर्यकोटिप्रतीकाशा चंद्रकोटिसुशीतला तडि
त्वंचलरूपाभा परंब्रह्मस्वरूपिणी विराट्मूर्तिदेवेशा विहरे
त्सर्वतो दले विकलाशक्तिसंयुक्ता स्तूयते च कृताञ्जलिः
महाकालादक्षिणे च कालिका शक्तिसंयुतः स्तूयते परया
भक्त्या महातानस्वरूपिणीः नारायणः पश्चिमे च महाल

क्ष्मीकुलेश्वरः स्तूयते परया भक्त्या भावेन कुंडलीपरां उत्तरे
च महादेवः पार्वत्या सह शंकरः स्तूयते नारिणीदेवी सर्पा
कारं महेश्वरी यदा कदाचित् ब्रह्मा चापकं वाकंघ्यणा निरि
तदा सृष्टिं स्थितिं चापि संहारं कर्तुमेव हि ते शक्ताः सर्वे
ह्यदेव साधुसाधु प्रकाशितं यदा लिंगे भवेल्लिम्सा तदाति
ह्रांब्रजेत्तु रः सदा सा परमा शक्तिः स्थिरलग्ने तदे भवेत् त
दा पुण्यकारो लोको भविष्यति न संशयः यदा मूर्ध्नि तिलिंग
प्रसादं ददाति सर्वपरं जन्मा शाक्ता भवेज्जीवस्तत्र शाड्डेवसि
द्धिदा यदा पुष्पं लिंगमूर्द्धि ददाति ब्रह्मरूपिणी गृहस्तत्स
ब्रह्मयो घात् गच्छेद्धालां चकामिनी षट्दले लिंगमूले च
पद्मं स्याद्रक्तपांडुरं तन्मध्ये रक्तपांडु च लिंगविष्णोर्द्वात्मि
कं शाकिनीशक्तिसंयुक्तं सर्वसिद्धिप्रदायकं ब्रह्माविष्णु
पाहृद्गोभगश्चेद्रः शचीपति राजते दलमध्ये तु सर्वशक्ति
समन्वितं स्तूयते परमं लिंगं सर्वकामार्थसिद्धिदं मूलाधा
रात्कुंडलिनी तत्र यत्नेन चालयेत् तस्याः स्पर्शनमात्रेण
दलेतस्यान्तरं सुखं पद्मोपरि व्रजेत्रैव महाशक्तिमहेश्वरि
किंतु तत्र स्थिताः सर्वे सर्वा गच्छति तत्कुले एकीभूय
ते सर्वे स्तुवंति सिद्धिदायिनी नाभाव षट्दलं पद्मं नवीन
जलदप्रभं विश्रांत कस्तत्र लिंगं शाकिनीशक्तिसंयु
तं इन्द्रो वह्निः पितृपतिर्नैऋतो वरुणं मरुत् कुबेरस्त
त्रईशानः स्वस्वशक्तिसमन्वितः तत्पद्मस्य मध्ये तु ब्रह्म
नाडीसमाश्रितां कृत्वा तस्य पात्राणि चोत्तरस्य तिभाव
येत् तेते देवास्ततो गत्वा स्तुवंति भक्तिसंयुताः हृदये च त
तो ध्यायेत् पद्मं षोडशभिर्दलैः महाशुक्लं महापद्मं राज

तारार
हस्य
३१

कुंभाकृतंदलं इन्दुश्चंद्रो गुरुः शुक्रो वामदेवः शिवापतिः
ईश्वरः शंकरः हंसः वामदेवः कुलेश्वरः कमलानायकः
कोपः कामरूपः कृपामयः कारणे षोडशाग्रे च स्वस्वयोषास
मन्वितः स्तूयते सर्वदा भक्त्या महालिंगमहेश्वरं लाकिनी
शक्तिसंयुक्तं भावयेच्च परात्परं तत्स्थानं समारुह्य तत्र देवी
समानयेत् तद्धामे राजते जीवस्तदधः पापपुरुष स्तुपान
सदायुक्तं गुरुतल्पकदिहृदये वज्रदंतसमोपेतं षड्दंतवि
भूषितं महाकायं महादेवरहिते हृदये सदा नवस्वर्णहस्तं
विकृतं सर्वदोषयुतं परं नवाकारं मोतलहीनं कुलाचारविही
नकं कामदं कामरूपेण रतिदोषप्रदं तथा ततः परं भावये
च्चद्दशपत्रे सुशोभने नीलवर्णे महापद्मे सर्वसिद्धिप्रदायकं
महालिंगं कामनाम राजते कामिनीयुतं कामदेवश्च शंभ
श्च कामाचारश्च कामुकः कामिनीनायकः कामो ब्रह्मान
दः कुलेश्वरः त्रिलोकेशः सदानंदः कौलो दशदले स्थितः
स्वस्वशक्तिसमोपेताः स्तुवंति कुंडलीपरां ललाटे नेत्रप
त्रे च ब्रह्मलिंगसमन्वितं सशक्तिर्विसृहद्भस्तोतितारा
समन्वितः तस्मिन्प्रियगाता देवी कुण्डलीशक्तिरुत्तमा
अधोमुखं सहस्रारं मोतदंडगनाभितः त्रिलोकस्थानतो
देवाः संतिनैवशक्तिभिः नारीत्रयसमोपीतं सरोजेद्वा
दशंदलं त्रिकोणकर्णिकातत्र ब्रह्मविस्तुशिवान्विता दंता
वौकवतीशाख्याशक्तिवज्रसमन्विता तत्रापि स्त्रीगुरुः सा
क्षात्सर्वभूतहितेरतः कर्पूरधवलो देवो ब्रह्मरूपिणम
व्ययं परमं शिवमाख्यातं कोवीरः साद्भिभावयेत् मूलादि
देवताः सर्वैस्तुवंति सर्वकारणं कुण्डलिनीमहाशक्तिल

लाटेकमलावत ध्यानयेच्छिवरूपेण वामभागे समानयेत् वा
मे रतिं च संस्थाप्य गुरोरेव सुसिद्धये समस्थाप्य गुरुस्तां च सा
कारं मंत्ररूपिणि तत्रापि गुरुणा देवि वीतशंका महेश्वरी
उवाम स्थीयते तेन महामोहविनाशिनी वाममार्गो गुह्य
तो स्याः वदन्ते स्मृत सुत्तमं तस्मीतासखेङः प्राणांजीवो
जीवति नित्यशः भावनाध्यानयोगेन यदि नाडीप्रवेश
येत् महासिद्धिं च लभते ध्यमरो नायते ध्रुवं इति तारा
सारे योगसारः षट्त्रास्ति कमलाकृतं जलिपरावीणा
परास्यारदा तारारायमनस्मरस्थियतमंत्रो मावचः का
रणं ब्रह्मानन्दकृतौ च साधनविधौ तारारहस्ये शुभे यो
गाचारविधौ चतुर्थपटलः सर्वार्थसिद्धिप्रदः इति तारा
रहस्यतंत्रं समाप्तमगात् ॥